तद्वीर्यवादवशशक्तिभृतौ झशुक्रौ
चान्द्रं बलं तु निखिलग्रहवीर्यबीजम् ॥" इति ।
"शुभं वर्गोत्तमे जन्म वेशिस्थाने च सद्ग्रहे।
अशून्येषु च केन्द्रेषु कारकाख्यग्रहेषु च ॥" इति वक्ष्यति ।
पुनः—"होरादयस्तनुकुटुम्बसहोत्थबन्धु-
पुत्रारिपत्निमरणानि शुभास्पदायाः ।
रिःफाख्यम् ।"

इति प्रथमं द्वादश भावा उक्ताः। तस्मान्मरणमष्टमराशौ तल्लग्नराशौ च चिन्त्य-मिति सिद्धं भवतु। कथयन्त इति ।

"सुहृदरिपरकीयस्वर्क्षतुङ्गस्थितानां
फलमनुपरिचिन्त्यं लग्नदेहादिभावैः ।
समुपचयविपत्तिः सौम्यपापेषु सत्यः
कथयति विपरीतं रिःफषष्ठाष्टमेषु ॥"

इत्युक्तत्वाल्लग्नादिभावेषु सौम्यपापेषु सत्सु समुपचयविपत्ती विज्ञातव्ये। रिःफषष्ठा-ष्टमेषु विपरीतं रिःफे शुभे सति व्ययाभावः जीवस्य तु खलत्वम् इत्युक्तत्वात् 'फलम-धिकमिदं यत्र भावाद्भवनभनाथगुणैर्विचिन्तनीयम्' । इत्युक्तमपि सर्वत्र चिन्त्यम्। तन्वादिभावानां तत्तद्राशितन्नाथयोर्बलवत्त्वे तद्भावपुष्टिरन्यथा हानिः । शुभाश्च न चे-दित्यनेन केन्द्रशुभानामायुष्करत्वमस्ति । तथा चोक्तमन्यत्र—

"त्रिषडायगतैः पापैः सौम्यैः केन्द्राश्रितैरशीत्यब्दः ।
जीवति चात्रोद्भूतो मिश्रैर्वा षष्टिवर्षं च ॥" इत्युक्तत्वात् ।
"गुरुचन्द्रौ हिबुकस्थौ लग्नेशे भावगे बलाढ्ये च ।
सौम्ये दशमं याते त्वशीतिवर्षं च परमायुः ॥" इति ।
"लग्ने क्षीणे शशिनि निधने रन्ध्रकेन्द्रेषु पापैः ।" इति ।

'केन्द्राष्टमेषु पापानामिति कष्टत्वात्त्रिकोणोपगतैः पापैः' इति त्रिकोणोपगतानां पापानामप्यतिकष्टत्वमुक्तम् । तस्मादतिशयेन कष्टाः—

"केन्द्रत्रिकोणनिधनेषु न यस्य पापा
लग्नाधिपः सुरगुरुश्च चतुष्टयस्थौ ।
भुक्त्वा सुखानि विविधानि च पुण्यकर्मा
जीवेच्च वत्सरशतं स विमुक्तरोगः ॥" इति ।

अहनि निशि च चन्द्रे स्वेऽधिमित्रांशके वा
सुरगुरुसितदृष्टे वित्तवान्स्यात्सुखी च ॥"

अरिष्टनाशकत्वमप्यनेनोक्तम् । 'सौम्यैः स्मरारिनिधनेष्वधियोग इन्दोः' इत्यादियोगोऽप्यरिष्टनाशकरः । 'होराफलं लग्नपतेः समानम्' इति वक्ष्यमाणेन जातफलं समस्तं लग्नाधिपसमानम् । लग्नपतौ बलाढ्ये शुभग्रहयुतदृष्टे पापग्रहदृष्टियोगरहिते च होराफलं शुभं परिपूर्णं भवति, अन्यथाप्यशुभं भवति । चन्द्रप्राधान्येन चन्द्रांशकप्राधान्येन वा आरोपणीयमिति ॥ ११ ॥

(भ्रमरविलसितम्)

योगे स्थानं गतवति बलिन-
श्चन्द्रे स्वं वा तनुगृहमथवा ।
पापैर्दृष्टे बलवति मरणं
वर्षस्यान्तः किल मुनिगदितम् ॥ १२ ॥

इति श्रीवराहमिहिरकृते बृहज्जातकेऽरिष्टाध्यायः षष्ठः समाप्तः ॥ ६ ॥

योगे स्थानमिति । चन्द्रशब्देन शुभाशुभफलदो लग्नाधिपो वा तत्तद्भावाधिपो वा ग्रहो विवक्षितो बलिनो ग्रहस्य राशिं स्वस्थितराशिं वा स्वराशिं वा प्रविशति तदा शुभाशुभफलप्राप्तिः । पापैर्दृष्टे बलवति मरणं शुभैर्दृष्टे शुभं वर्षस्यान्तःस्थानम् । वर्षशब्देन ग्रहपरिवृत्तिर्वोच्यते । चन्द्रस्य नाक्षत्रमासादर्वाक् सूर्यस्य संवत्सरादन्तर्भौमस्यापि स्वपरिवर्तमानादन्त इत्यादि । बृहस्पतेर्द्वादशसंवत्सरादन्तः फलदग्रहस्य स्वराश्युच्चलग्नबलवद्ग्रहगतराशिप्राप्तिकाले फलसिद्धिः । तथा चोक्तम्-

"कालेन यावता गच्छेच्छुभः पापोऽपि वा ग्रहः ।
लग्नं स्वोच्चं स्वगेहं वा तस्मिन्काले फलं भवेत् ॥
फलदा हि ग्रहाश्चिन्त्याश्चन्द्रसूर्योदयस्थिताः ।
कालेन यावता प्राप्तः शुभः पापोथवोदयम् ॥
तत्काले पृच्छता वाच्यमतीतं स्याच्छुभाशुभम् ।
शुभः पापोऽपि वा लग्नं यस्मिन्काले प्रवक्ष्यति ॥
तत्काले प्रवदेद्भावि शुभाशुभफलं नृणाम् ।"
लग्नादापञ्चमगैरानवमस्थैश्च पञ्चमान्नवमात् ।
आलग्नगैरपि भवेद्भावि च भूतं शुभं वाच्यम् ॥
लग्नवदुदितं कृत्वा द्वादशभागानतीतरविभागे ।

यतिमे पापस्ततिमे वर्षे भावक्षयः शुभा संपद् ॥
अथवा प्रश्नादौ तत्काले मरणादिदुःखकरम् ।"

यस्मिन्राशौ गुलिकादिषु कष्टमतो यस्मिन्राशौ समराशिः योगे बलिनः स्थानमित्युक्तम् । शुभशकुननिमित्तं च यस्मिन्राशौ शुभग्रहाः शुभफलदाश्च यस्मिन्राशौ तत्र चन्द्रार्कजीवमन्दा गृह्यन्ते । तेषु यस्मिन्काले यः कष्टस्तस्मिन्राशौ तिष्ठति सति मरणादिरित्यादि चिन्त्यम् । 'वर्षस्यान्तः किल मुनिगदितम्' इति किलशब्दोऽत्र विकल्पार्थः, अरिष्टफलं सर्वदा भविष्यति स्वपरीक्षितं यथापि मुनिगदितमेव कथनीयमिति ॥ १२ ॥

इति श्रीवराहमिहिराचार्यकृतबृहज्जातके दशाध्यायीटीकायामरिष्टयोगाध्यायः षष्ठः ॥ ६ ॥

अथायुर्दायाध्यायः ७.

(पुष्पिताग्रा)

मययवनमणित्थशक्तिपूर्वै-
र्दिवसकरादिषु वत्सराः प्रदिष्टाः ।
नवतिथिविषयाश्विभूतरुद्रा
दशसहिता दशभिः स्वतुंगभेषु ॥ १ ॥

अथायुर्दाय उच्यते ।

मययवनेति । स्वतुङ्गभेषु स्वोच्चस्थेषु ग्रहेषु जातस्य राजयोगसम्भवाद्राज्ञामुच्चनीचवदशा नेतव्या। 'यशस्विनां च जन्तूनामुच्चनीचक्रमो यतः' इत्युक्तत्वान्मययवनेत्यादि बह्वाचार्यकथनात्सर्वपुरुषाणां चिन्तनीयेत्युक्तं भवति । कलियुगादावेव ते वत्सरा उपदिष्टाः पुनस्त्रैराशिकवदायुर्ह्रसति ॥ १ ॥

(मन्दाक्रांता)

नीचेऽतोऽर्द्धं ह्रसति हि ततश्चांतरस्थेऽनुपातो
होरा त्वंशप्रतिममपरे राशितुल्यं वदन्ति ।
हित्वा वक्रं रिपुगृहगतैर्हीयते स्वत्रिभागः
सूर्याच्छन्नद्युतिषु च दलं प्रोज्झ्य शुक्रार्कपुत्रौ ॥ २ ॥

नीचेतोर्द्धमिति "होराराशि रिपुगृहगतैर्हीयते स्वत्रिभागं राश्यंशप्रतिमम्" इत्यंशशब्देनांशनाथस्य बलाधिक्ये राशितुल्यं साम्येऽपि स्यात् भतुल्यता इति वा । वक्रमित्यत्र वक्रशब्देन वक्रचारी ग्रहश्चोच्यते । तदंशकमानयने वक्रचारिणो ग्रहस्य शत्रुक्षेत्रहरणं न विधेयम् । शत्रुक्षेत्राणि त मययवनादिषु केषांचित्पक्षे जीवो जीव-

बुधाविति । अन्येषां सत्योक्ते सुहृद इत्यादिना कल्पनीयानि फलसंपदैव निर्णयः । सूर्याच्छन्नद्युतिषु इत्यत्र तु-शब्देन रहितकरांशकत्वेऽर्धराश्यंतरगतत्वे ऽयंशं हीयते । तथा चोक्तम्-

"हरत्यर्द्धं ग्रहो मूढस्त्र्यंशं राश्यंतरस्थितः ।" इति ।

तु-शब्देनांशकक्रमो बुधस्य मौढ्यहरणं नास्तीत्यपि सूचितम् । 'शुक्रार्की हरतो नायुश्चन्द्रजश्चांशकक्रमः' । इति वचनात् ॥ २ ॥

(प्रहर्षिणी)

सर्वार्द्धत्रिचरणपञ्चषष्ठभागाः
क्षीयन्ते व्ययभवनादसत्सु वामम् ।
सत्स्वर्द्धं ह्रसति तथैकराशिगाना-
मेकोंशं हरति बली तथाह सत्यः ॥ ३ ॥

सर्वार्द्धेति । एकराशिगानामेकोंऽशं हरति बलीति । तथाचोक्तम्-'एकर्क्षगतेषु बहुषु बलवानपहारकः । सर्वेऽप्यपहाराण्यपि हरणानि सम्भवंति चेत् । दृश्यार्धहरणं कृत्वाऽन्येषु महद्धरणं कार्यम् ॥"इति । 'कृते दृश्यार्धकेऽन्येषु महदेवैकमिष्यते' इत्युक्तत्वात् ॥ ३ ॥

(वसंततिलका)

सार्द्धोदितोदितनवांशहतात्समस्ता-
द्भागोऽष्टयुक्तशतसंख्यमुपैति नाशम् ।
क्रूरे विलग्नसहिते विधिना त्वनेन
सौम्येक्षिते दलमतः प्रलयं करोति ॥ ४ ॥

सार्धोदितोदितेति । विधिना त्वनेनेत्यत्र तु-शब्देन ग्रहबलादन्यैर्लक्षणैर्दीर्घायुषो संभवे लमायुष्येव क्रूरोदये हीयमानमयोज्यमिति सूचितम् । लमायुष्येव तच्छोधनमिति वचनादल्पायुष्ये समस्तायुष्येवं शोधनमिति स्वान्स्वान्संशोध्य मध्यायुष इति वचनात् ॥ ४ ॥

(शिखरिणी)

समाः षष्टिर्द्विघ्नी मनुजकरिणाम्पञ्च च निशा
हयानां द्वात्रिंशत्खरकरभयोः पञ्चककृतिः ।
विरूपा साप्यायुर्वृषमहिषयोर्द्वादश शुनां
स्मृतञ्छागादीनां दशकसहिताः षट् च परमम् ॥ ५ ॥

समा इति । द्विघ्ना षष्टिर्विंशत्यधिकशतं संवत्सराः पश्चनिघ्नाश्च मनुष्याणां करिणां च परमायुः । हयानामश्वानां च द्वात्रिंशत् । खरकरभयोः पञ्चकृतिः पञ्चानां वर्गः पञ्चविंशतिसंवत्सराः वृषमहिषयोः सा पंचककृतिः विरूपा चतुर्विंशतिसंवत्सरा इत्यर्थः शुनां द्वादश वत्सराः परमायुः । छागादीनामित्यत्रादिशब्देन विमृगयोरपि ग्रहणम् । किमर्थमत्र करिप्रभृतीनां परमायुरुक्तमिति चेदुच्यते तेषां करीन्द्रादीनामायुर्निरूपणार्थमिदं परमायुरुक्तम् । उक्तेन परमायुषा सूर्यादीनां ग्रहाणां पृथक् पृथग् दशासंवत्सरास्त्रैराशिकेनावगन्तव्याः । अस्मिंस्त्रैराशिके तु नवतिथिविषयाश्विभूतरुद्रा दशसहिता दशभिरुक्तसंवत्सराः समुदायाः सप्तविंशत्यधिकशतं तत्प्रमाणराशिर्नवतिः सूर्यादीनां पृथग् दशासंवत्सराः भवंति । ततो हयादीनां जन्मकालीनैर्ग्रहैरुक्तविधिनायुर्निरूपणीयमित्युक्तं भवति ॥ ५ ॥

(पुष्पिताग्रा)

अनिमिषपरमांशके विलग्ने
शशितनये गवि पञ्चवर्गलिप्ते ।
भवति हि परमायुषः प्रमाणं
यदि सकलाः सहिताः स्वतुंगभेषु ॥ ६ ॥

अनिमिषेति । अस्य श्लोकस्येन्द्रदैवं छन्दस्तेनास्मिन्योगे जातश्चक्रवर्तिर्भवतीति सूचितम् । अन्यच्च कैश्चिद्गणिततन्त्रे बुधे निरूपिते वृषे पञ्चकृतिलिप्तात्मको बुधो रवौ मेषे दशमांशलग्ने तत्संभवति । तस्मात्कालांतरे ग्रहगणितानामदृढत्वात्कदाचिद्गणितेन बुधस्तादृशो भविष्यति । इति संचिन्त्य तथोक्तं तदर्थं खलु पञ्चसिद्धान्तिकाः प्रादुर्भूताः । कदाचिदेकः सिद्धान्तः संवदतिदृग्गणितानीतयोः कदाचिदन्यः पुनः कदाचिदपरस्तस्मात्तत्काले परीक्ष्य ग्रहाणां दृग्गणितसाम्यमानेतव्यमिति ॥ ६ ॥

(शालिनी)

आयुर्दायं विष्णुगुप्तोपि चैवं
देवस्वामी सिद्धसेनश्च चक्रे ।
दोषस्तेषां जायतेष्टावरिष्टं
हित्वा नायुर्विंशतेः स्यादधस्तात् ॥ ७ ॥

आयुर्दायमिति । बहाचार्याभिप्रेतोऽप्ययमुच्चदशामार्गः कदाचिदभिवरति तदर्थमिदमुक्तम् ॥ ७ ॥

(शालिनी)

यस्मिन्योगे पूर्णमायुः प्रदिष्टं
तस्मिन्प्रोक्तं चक्रवर्तित्वमन्यैः ।
प्रत्यक्षोयं तेपु दोषोऽपरोपि
जीवत्यायुः पूर्णमर्थैर्विनापि ॥ ८ ॥

यस्मिन्निति । विषयविभागं प्रत्यक्षं चानादृश्योयं मार्गो नाङ्गीकर्तव्य इत्यभिप्रायः। तस्माज्जन्मकालं सम्यगवगम्य दशामानीय यया दशायानुभूतफलसंवादो दृश्यते तया भविष्यत्फलं चिन्तयेदिति । तथा चोक्तम्-

"यस्मिन्क्रमे संगृहीते पूर्वभुक्तं दशाफलम् ।
न विसंवादमभ्येति स क्रमो मम संगतः ॥ ८ ॥" इति ।

(उपछन्दः)

स्वमतेन किलाह जीवशर्म्मा
ग्रहदायम्परमायुषः स्वरांशम् ।
ग्रहभुक्तनवांशराशितुल्यं
बहुसाम्यं समुपैति सत्यवाक्यम् ॥ ९ ॥

स्वमतेनेति । स्वमतेनेत्येको दोषः । कदाचित्संवदतीति ग्रहयुक्तनवांशराशितुल्यमिति स बहुसाम्यमिति । सत्यवाक्यत्वात्सत्याचार्यस्य सत्यनाम केवलं रूढं गौणं च भवति । सत्यवचनस्य प्रामाण्यमस्तीत्यर्थः । नवांशराशितुल्यामिति । लग्नराशेश्च लग्नांशकमाबल्येंऽशकक्रमदशा क्रमाबल्येंऽशकक्रमं दशा नेतव्येति । ९ ॥

(आर्या)

सत्योक्ते ग्रहमिष्टं लिप्तीकृत्वा शतद्वयेनाप्तम् ।
मण्डलभागविशुद्धेऽब्दाः स्युः शेषात्तु मासाद्याः ॥ १० ॥

(वंशस्थम्)

स्वतुङ्गवक्रोपगतैस्त्रिसंगुणं
द्विरुत्तमस्वांशकभत्रिभागगैः ।
इयान्विशेषस्तु भदत्तभाषिते
समानमन्त्यप्रथमेप्युदीरितम् ॥ ११ ॥

सत्योक्तेति । स्वतुंगेति ।भदत्तभाषिते सत्योक्ते पक्षे इयान्विशेषः स्वतुंगवक्रोपगतैरिति । ग्रहैर्यः आयुर्दायः आनीतः स त्रिसंगुणः कार्यस्त्रिभिर्गुण्य इत्यर्थः । वर्गो-

त्तमस्वनवांशकस्वगृहस्वद्रेष्काणगतैर्ग्रहैः प्राप्तायुर्दायो द्वाभ्यां गुण इत्यर्थः । अत्र तु-शब्देनायमर्थोऽवगम्यते । यदिदमायुः ग्रहयुक्तनवांशराशितुल्यमित्युक्तम् । तद्ग्रह-बलादीर्घायुषो संभवे पुरुषस्य ग्रहाणां भुक्तमेषाद्यंशकतुल्यां दशामानीय हरणानि कृत्वा द्वित्रिगुणसंभवे द्वित्रिगुणं च सम्पादितं ग्रहभुक्तराशिसंख्यातुल्यैः संवत्सरैः संयोज्य सम्पादनीयामिति । ग्रहयुक्तनवांशराशितुल्यमित्यनेनैव ज्ञातव्यं भवति । समान-मन्यदुदीरितमिति प्रथमे उच्चनीचदशाविधाने यदुदीरितं तदत्रापि समानं दृश्यार्ध-हरणमूढहरणानि पूर्ववत्कार्याणीत्यर्थः । अत्रापि को विशेषोऽस्ति । अंशकक्रमवि-धाने उदासीनहरणं च क्रियते। शत्रुक्षेत्रगतस्य त्रिभागहरणविधानादुदासीनक्षेत्रगतस्य षड्भागहरणं च विधेयं भवति 'स्वतुङ्गवक्रोपगतैस्त्रिसंगुणः' इत्यत्र तुङ्गवक्रोपगतयोः सह पाठाद्गुणसाम्याच्च स्वोच्चतुल्यं बलं वक्रगतौ भवतीत्यपि सूचितम् ॥१०॥११॥

(इन्द्रवज्रा)

किंत्वत्र भांशप्रतिमं ददाति
वीर्यान्विता राशिसमश्च होरा ।
क्रूरोदये पापचयः स नात्र
कार्यं च नाब्दैः प्रथमोपदिष्टैः ॥ १२ ॥

किंत्वत्रेति । अत्र सत्योपदेशे किंचिद्विशेषोऽस्ति । लग्नराश्यंशकस्य लग्नराशि-गतो बलाधिके होरा राश्यंशप्रतिममायुर्ददाति । अंशकगते होरा वीर्यान्विता चेद्रा-शिसममायुर्ददाति । पुनश्च क्रूरोदये योऽपचय उच्चनीचमार्गे विहितः सोऽत्र न कार्यः । प्रथमोपदिष्टैर्नवतिथीत्यादिशब्दैश्च न कर्तव्यमिति ॥ १२ ॥

(इन्द्रवज्रा)

सत्योपदेशो वरमत्र किन्तु
कुर्वन्त्ययोग्यं बहुवर्गणाभिः ।
आचार्यकत्वञ्च बहुघ्नताया-
मेकन्तु यद्भूरि तदेव कार्यम् ॥ १३ ॥

सत्योपदेश इति । अत्र कालियुगे अंशकक्रमदशा संवादभूयिष्ठेति ॥ १३ ॥

(पुष्पिताग्रा)

गुरुशशिसहिते कुलीरलग्ने
शशितनये भृगुजे च केन्द्रगे वा ।

भवरिपुसहजोपगैश्च शेषै-

रमितमिहायुरनुक्रमाद्विना स्यात् ॥ १४ ॥

इति श्रीवराहमिहिराचार्यकृते होराशास्त्रे बृहज्जातके

आयुर्दायाध्यायः सप्तमः ॥ ७ ॥

गुरुशशीति। अमितायुर्योगा उक्ताः बह्वत्र निरूपणीयमस्ति तत्र सर्वे ग्रहा उक्त-स्थानस्थाश्चेत्तस्यायुरमितं चन्द्रलग्नौ पृथक्स्थौ चेत्ताभ्यां पृथङ्निरूपणीयं चन्द्राद्वेति वक्ष्यति। केन्द्रस्थानामायुष्करत्वं त्रिषडायगतानां पापानामप्यायुष्करत्व-मस्तीति सर्वत्र चिन्तनीयं चन्द्रलग्नयोर्बलाधिक्यं चायुष्करं बलिष्ठस्य जीवस्य लग्नगतत्वं च।

"बलिष्ठो लग्नगः सूरिः सर्वारिष्टविनाशकृत् ॥"

इत्यादिवचनात् ॥ १४ ॥

इति दशाध्याय्यामायुर्दायाध्यायः सप्तमः ॥ ७ ॥

अथ दशान्तर्दशाध्यायः।

(मालिनी)

उदयरविशशांकप्राणिकेन्द्रादिसंस्थाः

प्रथमवयसि मध्येऽन्ते च दद्युः फलानि।

नहि न फलविपाकः केन्द्रसंस्थाद्यभावे

भवति हि फलपक्तिः पूर्वमापोक्लिमेऽपि ॥ १ ॥

उदयेति। विंशत्यधिकशतसंवत्सराः परमायुः। तत्त्रिभागं कृत्वा प्रथमभागे वयसि उदयप्राधान्येन फलनिर्देशः। मध्यभागे वयसि चन्द्रप्राधान्येनान्त्यभागे वयसि रविप्राधान्येन कार्य इति। अस्मिन्नर्थे उदयरवीति क्रमो न विवक्षितः। अथ दशापरिग्रहविधौ तु उदयरविशशांकेषु बलवतो दशा प्रथमा। पुनस्तत्केन्द्रगतस्य पुनरापोक्लिमगतस्य। तदुक्तम्-'नहि न फलविपाकः' इत्यादिना केन्द्रे पुनः सप्तमगतस्य अन्त्ये दशमगतस्य पुनः पणफरगतस्य तत्र प्रथमलग्नाद्द्वितीयगतस्य पुनः पञ्चमगतस्येत्यादि पूर्ववत्। आपोक्लिमे च तद्वत्। उच्चनीचमार्गेषु दिवस-करादिष्विति दिवसकरस्य प्रथमोक्त्या तदादिदशापरिग्रहो युक्तः। नवांशराशि-तुल्यमिति। राशिकथनादंशकक्रमे लग्नादिदशापरिग्रहः। चन्द्रारेन्दुजेति। चन्द्रस्य प्राथम्योक्त्या निसर्गादयो चन्द्रदशापरिग्रहः इति प्रायश उपदिष्टं भवति। बाल्ये यौवने वार्धक्ये च केन्द्रादिस्थाः फलदाः। तथा च सारावल्याम्-

"केन्द्रात्पणफरमापोक्लिमं च संज्ञितं ततः।
परस्ताद्बाल्ययुवस्थाविरत्वे क्रमेण फलदा ग्रहास्तेषु॥" इति।

अनेनाध्यायेन प्रश्नादावप्युपयुज्यते। उदयरविशशाङ्कप्राणिनो यस्मिन्काले प्रष्टा स्वमभिमतं पृच्छति तदोदयराशिमवगम्य छायाजलयन्त्रादिभिर्गतनाडिकाः विज्ञाय ताभिरुदयलग्नमानीय तेन शुभाशुभं चिन्त्यम्। तदानीमेव रविमानीय तेनापि शुभाशुभस्य पाककालश्च निरूपणीयः। चन्द्रमपि तदानीमानीय तेन लग्नवत्फलं निरूपणीयम्। प्राणीति। प्रच्छकस्य भावादिना तेनारूढेन भूचक्रराशिना चोदयारूढवशादवगतेन छिद्रराशिना च केन्द्रादिसंस्थैर्ग्रहैश्च फलं चिन्त्यते केन्द्रस्थैः शुभाशुभैः प्रथमे वयसि सदसत्परिपाकः पणफरस्थैर्मध्ये वयस्यापोक्लिमस्थैरन्ते वयसि। केन्द्रसंस्थाद्यभावे सर्वदा सत्फलविपाको भवत्येव। केन्द्रसंस्थाद्यभावे लग्नमित्यर्थः। तेन त्रिषु वयस्सु च फलनिरूपणं कर्तव्यमित्यर्थः। आपोक्लिमस्था अन्त्ये वयस्येव फलं दद्युरित्यत आह–'आपोक्लिमस्थिताः पूर्वमपि फलं दद्युः' इति किं पुनः पणफरस्थास्तृतीयेन भावेन सहजगुणाः प्रथमे वयस्यपि चिन्त्याः नवमेन गुरुगुणदोषाः। षष्ठेन शत्रवः। पञ्चमेन पुत्राः। द्वितीयेन धनमेकादशेन च लाभमित्यादिसर्वभावफलमपि सर्वदा चिन्त्यमित्यर्थः। केन्द्रादिसंस्था इत्युक्तविधिना पूर्वमापोक्लिमेऽपि इति पक्षान्तरं वा। आपोक्लिमे गतफलं, केन्द्रे वर्तमानफलं, पणफरे भविष्यत्फलं, केन्द्राद्यप्राप्तिष्वनिवृत्ता इति। एतन्नवमाध्याये॥ १॥

(इन्द्रवज्रा)

आयुष्कृतं येन हि यत्तदेव
कल्प्या दशा सा प्रबलस्य पूर्वा।
साम्ये बहूनां बहुवर्षदस्य–
तेषाञ्च साम्ये प्रथमोदितस्य॥ २॥

आयुरिति एवमुदयारूढच्छिद्रचन्द्राद्यैः सर्वप्रश्ने प्रथममायुश्चिन्त्यम्, अरिष्टयोगा राजयोगादयश्च सर्वे चिन्त्याः। तथा दशा चानेतव्या। तथा चोक्तम्–

'जनलग्नतया प्रश्नलग्नं संकल्प्य पण्डितः।
जातके यद्यदुद्दिष्टं तत्तत्प्रश्नेऽपि चिन्तयेत्॥" इति।

तत्र विशेषः–आरूढच्छत्रलग्नाधिपतीनां यो बलवांस्तस्य दशा अवस्था पूर्वं भवति। ग्रहाणां सप्तावस्था निरूपणीयाः। "अथ बालः समर्क्षस्थो बालो बन्धुगृहे स्थितः। मृतनामातिनीचस्थो दशैवं स्थानतो भवेत्।" "सूर्यादुदितमात्रोऽसौ सोऽतिबालःप्रकीर्तितः।"

बालः सप्तांशकादूर्ध्वं कुमारस्तु ततः परम् ॥
वक्रारम्भे युवा प्रोक्तो वक्रकाले नराधिपः ।
आसन्नास्तमयो वृद्धो मृतोऽस्तंगत ईरितः ॥
अतिबालो दशाकाले जडो रोदनतत्परः ।
बालस्य तु दशाकाले क्रीडासक्तः कुमारकः ॥
कुमारस्य दशाकाले विद्यासक्तश्चरेन्नरः ।
यौवनस्य दशाकाले कामी भोगपरायणः ॥
वृद्धसंज्ञदशाकाले बलहीनो जडात्मकः ।
मृतसंज्ञदशाकाले मरणं याति निश्चयात् ॥" इति ।

एवमंशपतिर्वोदयाधिपतिर्वा लग्नांशकाधिपतिर्वा यो बलवान् तस्य या अवस्था सात्र पूर्वा भवतीति । तेषां बलसाम्ये बहुवर्षदस्य बहुकालफलदस्य निगदितेति निरूप्य बहुकालं यस्य फलस्य संवादस्तेन ग्रहेण फलं चिन्त्यम् । तेषां च साम्ये प्रथमोदितस्य बहुफलं संवादिनां सौम्ये यो ग्रहः प्रथमोदितस्तेषु राशिष्वेकत्र राशौ स्थितं न वदेदित्यर्थः ॥ २ ॥

(वसन्ततिलका)

एकर्क्षगोऽर्द्धमपहृत्य ददाति तु स्वं
त्र्यंशं त्रिकोणगृहगः स्मरगः स्मरांशम् ।
पादम्फलस्य चतुरस्रगतः सहोरा-
स्त्वेवम्परस्परगताः परिपाचयन्ति ॥ ३ ॥

एकर्क्षग इति । एकराशिगतौ द्वौ ग्रहौ चेत्तयोरेकोऽन्यस्य फलं स्वयं शुभश्चे-त्तत्पुष्टं करोति, अशुभश्चेत्स्वयमशुभम् इत्यर्थः । तैर्ग्रहैः स्वकैर्भपैर्गुणदोषा भवन्ति । पञ्चमस्थशुभाशुभैः पुत्रवशान्नवमस्थशुभाशुभैः पितृवशात्सप्तमस्थशुभा-शुभैः कलत्रवशाच्चतुर्थगतैर्मातृवशादष्टमस्थैरायुःक्लेशादिभिर्यथा पञ्चमस्थः शुभः पुत्रगुणादात्मगुणं त्र्यंशाधिकं करोति । नवमस्थः शुभः पितृगुणादात्मगुणं त्र्यं-शाधिकं करोति । तद्वीक्षणं च सप्तमस्थः शुभः कलत्रगुणमात्मगुणं सप्तांशाधिकं करोति । एवं दोषं च परस्परगताः परिपाचयन्ति ॥ ३ ॥

(इन्द्रवज्रा)

स्थानान्यथैतानि सवर्णयित्वा
सर्वाण्यधश्छेदविवर्जितानि ।

दशाब्दपिण्डे गुणका यथांश-
च्छेदस्तदैक्येन दशाप्रभेदः ॥ ४ ॥

स्थानानीति । एतानि स्थानानि पञ्चमनवमसप्तमचतुर्थाष्टमस्थानानि पापसंबाधाभावाच्छुभयोगाच्च छेदो नाशस्तेन हीनानि यदि चिन्तितानि तदानीं दशाब्दपिंडे गुणनादशाब्दपतिः शुभमेव तस्य भावस्य यथासम्भवं छेदः । लग्नं द्वादशधा विभज्योद्यदंशकेन वर्तमानार्थे गुणदोषौ चिन्त्यौ अतीतैर्द्वादशांशकैरधः, अतीतप्रवत्सरेषु गुणदोषौ चिन्त्यौ । एषामंशकैर्भविष्यत्संवत्सरेषु । तदुक्तम्—यथांशच्छेदाः यथांशस्य छेदो भवति पापयोगादाधिपतिबलहान्या तदैक्येन तत्संयोगादशाप्रभेदोऽवस्थाप्रभेदः अवस्थादुःखमित्यर्थः । तस्मिन्संवत्सरे तस्य भावस्य—दुःखमित्यर्थः । तथा चोक्तम्—

"लग्नवदुदितं कृत्वा द्वादशभागानतीतरविभागे ।
यतिमे पापस्ततिमे वर्षे भावक्षयः शुभैः सम्पत् ॥
एष्यद्वादशभागैः सदसद्युक्तैस्तथैष्यवर्षेषु ।" इति ॥ ४ ॥

(वैतालीयम्)

सम्यग्बलिनः स्वतुङ्गभागे
सम्पूर्णा बलवर्जितस्य रिक्ताः ।
नीचांशगतस्य शत्रुभागे
ज्ञेयानिष्टफला दशा प्रसूतौ ॥ ५ ॥

सम्यगिति । जातकेषु सर्वबलसम्पूर्णस्य दशा शुभा सर्वबलहीनस्य दशा अशुभा इतरा मध्यमा । तथा च सारावल्याम्—

"स्वोच्चस्वराशिनिजभागसुहृद्गृहस्थाः
सम्पूर्णवीर्यरुचिरा बलिनः स्वकाले ।
मित्रोच्चभागसहिताः शुभदृष्टियुक्ताः
श्रेष्ठां दशां विदधति स्ववयःसु खेटाः ।
नीचशत्रुगृहं प्राप्तः शत्रुनीचांशसुर्यगः ।
पापसम्पर्कमापन्नो दशां कुर्यादशोभनाम् ॥"

इति प्रश्नादौ । उदयाधिपतिरविशशांकारूढपतयश्च तैर्युक्तराश्यधिपाश्च सम्यग्बलिनः सोच्चभागस्थाः सम्पूर्णफलदास्तेषु बलहीनेषु पुरुषस्यावस्था नीचांशगताः शत्रुभागगताश्चेदनिष्टफलसामग्र्यम् । यथा गुरोर्हेमाश्वात्मजकुञ्जरावरचयः इति दशाफलमुक्तम् । न तन्नियतं दृश्यते लोके जनानां गुरुदशाकालः संभाव्यः । न तेषा-

मुक्तफलप्राप्तिरित्यनुपपत्तिपरिहाराय प्रसूताविव्युक्तम् । प्रसूतौ सम्पूर्णबले ग्रहे नृपत्वं भवतीत्युक्तम् 'जनयति नृपमेकोऽप्युच्चगो मित्रदृष्टः' इत्यादिना । ततः कुञ्जराश्वादिप्राप्तिश्चोपपद्यत इति । अरिष्टफलेत्यत्र फलशब्देन पूर्वत्र सम्पूर्णेऽष्टमफला इति । एतदुक्तं भवति । जन्मकाले ग्रहे बलवति दशायां तस्योक्तानि शुभफलान्येव । शुभग्रहः स्वोच्चगतो लग्नगतश्चेत्सर्वार्थसिद्धिप्रदो भवति । तथा च विद्वज्जनवल्लभाख्ये-

"पश्यत्येकश्चेच्छुभेषु स्वमुच्चं लग्नं प्राप्तः खेचरः प्रश्नकाले ।
स्थानैश्वर्यार्थोच्छ्रयो वृद्धिवाच्या निस्वं देहं एवमेवात्र तज्ज्ञैः" इति।

ननु तस्मिन् बलिन इत्यादिश्लोके दशादातुर्ग्रहस्य शुभदृष्टिरस्ति । चेद्दशा शुभा इत्युक्तं सारावल्यां तु-'शुभदृष्टियुक्ताः श्रेष्ठां दशां विदधति' इत्युक्तम्। कथमेतद्घटते । नैष दोषः ।

"अशुभगदिता योगा याप्या भवन्ति शुभेक्षिताः ।
दृष्टस्तु शुभैर्न यदा मृत्युस्तु भवेदचिरात् ॥
यदि च न शुभैर्वीक्षितः शक्तिमद्भिः शुभैर्युतेक्षिते ।
भृगुसुतशशिपुत्रदेवपूज्यैर्यदि बलिभिर्न युतोऽवलोकितो वा ॥"
इत्यादिवचनैः शुभदृष्टेरशुभनाशकरत्वं केन वा नोह्यते ।
"क्षीणेन्द्वर्कमहीसुतार्कतनयाः पापा बुधस्तैर्युतः ।"

इत्युक्तस्य ग्रहाणां शुभाशुभफलप्रदानज्ञापनं विना किं प्रयोजनमवगम्यते । तस्माच्छुभग्रहदृष्टिः शुभेति किमु वक्तव्यम् । पुनरुच्चगतं लग्नस्थं ग्रहमुच्चको ग्रहः पश्यति चेद्राज्ञां राज्यसिद्धिरपि वक्तव्या । लग्नशब्देनारूढोऽपि विवक्षितः । तथा च विद्वज्जनवल्लभाख्ये-

"यदि विलग्नगमुच्चगतं ग्रहं समवलोकयते ग्रह उच्चगः ।
भवति तत्समये समुपेयुषः सपदि राज्यमिति प्रवदेद्बुधः ॥"
"जनयति नृपमेकोऽप्युच्चगो मित्रदृष्टः
प्रचुरधनसमेतं मित्रयोगाच्च सिद्धिम् ।"

इति वक्ष्यति च 'उच्चस्थस्य ग्रहस्य वक्रगतेश्च बलं नान्यैर्हरिष्यते ।' तथा च सारावल्याम्-

"उच्चांशेन विलोमे च बलं नान्यैर्हरिष्यते ।
कालस्यातिबलत्वं स्याच्चेति चारसवक्रितः ॥" इति । ॥ ५॥

(इन्द्रवज्रा)

भ्रष्टस्य तुङ्गादवरोहिसंज्ञा
मध्या भवेत्सा सुहृदुच्चभांशे ।

आरोहिणी निम्नपरिच्युतस्य
नीचारिभांशेष्वधमा भवेत्सा ॥ ६ ॥
(उपजातिः)
नीचारिभांशे समवस्थितस्य
शस्ते गृहे मिश्रफला प्रदिष्टा।
संज्ञानुरूपाणि फलान्यथैषां
दशासु वक्ष्यामि यथोपयोगम् ॥ ७ ॥

भ्रष्टस्येति। नीचारिभांशे इति। अतितुङ्गाद्भ्रष्टस्यातिनीचभावावधिदेशस्थाने अवरोहिसंज्ञा दशा॥ अतिनीचाद्भ्रष्टस्यात्युच्चभागान्तरास्थितौ आरोहिणी दशा। एतदुक्तं भवति। परमोच्चे यत्फलमुक्तं तत्फलं तस्मादारभ्य क्रमेण ह्रसति परमनीचे शून्यं भवति, तत्रापि सुहृदुच्चभागादिस्थितवशात्तत्फलस्योत्कर्षापकर्षौ ज्ञेयौ। पुनरयमुपदेश उच्यते जन्मलग्नेशयोर्बलवान् जन्मकाले तस्यारोहित्वे पूर्वस्मात्तस्य ग्रहस्योपघातो भवति आरोहित्वे वृद्धिर्भवति। एवमुच्चनीचवशादपि फलं चिन्त्यमित्युक्तं भवति। उच्चनीचवशान्मूलत्रिकोणस्वगृहमित्रोदासीनशत्रुक्षेत्रनीचस्थितवशाच्च फलविशेषश्चिन्त्यते इत्युक्तम्। नीचारिभाग इति अत्र नीचारिभागे शस्तग्रहस्य दशा मिश्रफला। अत्र ग्रहसंस्थितराशिमात्रावगमनेन केवलं वक्तव्यम्। अंशकपरिज्ञानं चावश्यकमित्यवगन्तव्यम्। नीचारिभाग इति। सर्वेषु राशिषु नीचारिभागेषु नीचनवांशे शत्रुनवांश इति। नीचारिगृहे शस्ते नवांशके स्थितस्य दशा च मिश्रफलदा इत्येतदप्यनेनैवोक्तं भवति। शस्तानि ग्रहाण्युच्चत्रिकोणक्षेत्रबन्धुराशयस्तेषु राशिष्वपि किंचिद्भिद्यते। तथा च सारावल्याम्–

"अत्युच्चमिति द्रव्यं महान्तमपि भास्करः स्वतुंगस्थः।
मृष्टाशनाम्बराढ्यं सुभूषणं शीतगुः कुरुते॥
तेजस्विनं कुतनयः दुःखसहं गर्वितं प्रवरशूरम्।
मेधाविनं कुलाढ्यं निपुणं वाक्ये बुधः कुरुते॥
विख्यातं गुरुराढ्यं विद्यासंभृतसत्कृतज्ञं च।
स्वोच्चे भृगोश्च तनयो विलासहास्यप्रनृत्यरसम्॥
स्वोच्चस्थो रवितनयो नृपलब्धनियोगमपि जनयेत्।"
"भानुस्त्रिकोणसंस्थो धनवन्तं मुख्यशीलमतिनिपुणम्॥
भोक्तारं धनवन्तं शशी प्रसूतौ त्रिकोणगः पुरुषम्।
वक्रोऽपि तस्करपतिं शूरं बलनिर्दयं चापि॥

सौम्यो विनोदशीलं त्रिकोणगो वै नरं कुरुते ।
जीवः पुरोहितवरं महत्तरं नयविदां सुखोपेतम् ॥
दानवगुरुरपि जनयेद्ग्रामवरणां वरिष्ठमास्यमतिम् ।
आत्मत्रिकोणमार्किर्धनहृतकुलपतिं स्वधर्मरतम् ॥"
"शीतरश्मिर्मनस्विनं रूपवन्तमात्मर्क्षे तीक्ष्णमयूखः ।
कुरुते महोग्रमुद्युक्तकर्माणमाढ्यं प्रचंडचपलं भौमः ॥
कुरुते स्वराशिगः पुरुषं शशितनयोऽपि कुरुते कथापण्डितं चापि ।
काव्यश्रुतज्ञमाढ्यं शुभचेष्टवेषं वाक्पतिः स्वराशिस्थः ॥
दानवपूज्यः कुरुते कृषीवलं स्थिरवित्त च ।
कुरुते शनैश्चरोऽपि मान्यमदुःखं स्वराशिगः पुरुषम् ॥"
"मित्रगृहेऽर्कः ख्यातं सुस्थिरहृदयं च दातारम् ।
मित्रर्क्षगः शशांकः समुदयसौख्यं सुधनमानम् ॥
अंगारकोऽपि कुरुते सुहृद्धने रक्षणासक्तम् ।
शशिजः सुहृद्गृहगतः कुरुते चातुर्यहास्यधनवंतम् ॥
वचसामधिपः पूज्यं सतां च संमृष्टकर्माणम् ।
मित्रगृहे भृगुतनयः सुहृत्प्रियं दयितवित्तश्च ॥
इष्टसुतं भास्करजः कुरुते च परान्नभोजिनं पापम् ।"
"नीचे सविता कुरुते प्रेष्यं बान्धवजनावधूतं च ॥
हिमरश्मिरल्पपुण्यं रोगिणमतिदुर्भगं लोके ।
नीचस्थः क्षितितनयोऽनर्थव्यसनोपतप्तमतिनीचम् ॥
नीचे हिमकरपुत्रः क्षुद्रं स्वकजातबद्धमतिवैरम् ।
नीचे गुरुः प्रकुरुते मलिनं प्राप्तावमानमतिनीचम् ॥
असुरदयितः स्वतन्त्रं नष्टदारं विषमशीलं च ।
कोणो विपन्नशीलं विगर्हिताचारमध्वनिरतं च ॥"
"कुरुते शत्रुगृहेऽर्को निःस्वं विषपीडितं चापि ।
तुहिनमयूखः कुरुते हृद्रोगिणमरिगृहे नरं सततम् ॥
बद्धामयमरिभाजं विकलं रुधिरोऽतिदुर्भगं लोके ।
अज्ञानं वाग्दीनं बुधोरिभे नैकदुःखमतिदीनम् ॥
अरिभे गुरुर्विधत्ते वैद्यं विधनं च सद्वृत्तम् ।
शुक्रारिगृहे भृतकं कुतन्त्रिमतिदुःखितं जनयेत् ॥
भास्करपुत्रः कुरुते मलिनं व्याधध्वशोकसंतप्तम् ।"

इत्येतत्सर्वं राशिफलाध्यायेन कुलसममकुलमुख्येत्यादिना च क्षिद्यतीत्यादि-राश्याश्रयवशादुक्तानामंशकाश्रयवशादन्यथार्थं निरूपणीयमिति–

"नीचारिभांशे समवस्थितस्य शस्ते गृहे मिश्रफला प्रदिष्टा।'

इत्युक्तम्। एतदिष्टानिष्टमिश्रफला प्रदिष्टेत्युक्तम्। एवमिष्टानिष्टमिश्रफलं निरूपणीयम्। एवमिष्टानिष्टमिश्रफलानयनं सम्यग्बलिन इत्यर्धश्लोकद्वयेनोच्चत्रिकोण-स्वसुहृदित्यादिकेनोपदिष्टाः। भावाध्याये वक्ष्यमाणेन श्लोकेनाचार्येण सूचितमत्र। अन्यशास्त्रेपि स्पष्टमुक्तमत्र मयोच्यते–

'अर्कादिग्रहान्परमनीचभागाद्विशोध्य शिष्टान्राशीन् दशभिर्भागान् विंशत्या च गुणयेत् पुनश्चेष्टाकेन्द्रं पूर्ववदानयेत् सायनांशोऽर्कस्त्रिराशिसहितोऽर्कस्य चेष्टाकेन्द्रम्।'

भानुस्फुटरहितश्चन्द्रस्य चेष्टाकेन्द्रम्। कुजादीनां तु मध्यस्फुटान्तरार्धम्। मध्यमे स्फुटाधिके शीघ्रोच्चयो भवेत् मध्यमे स्फुटादूने शीघ्रोच्चाद्विशोधयेत् पुनस्तस्माच्छी-घ्रोच्चात्स्फुटं त्यजेत्। एवं चेष्टाकेन्द्रमानीय "शेषमण्डाकियद्यइच्छ इष्टकफलं वरित्तवेणुम् अदजातकसंग्रहात् लेयक छिपोछईरुक्करद।" एवमानीते इष्टानिष्टफले तस्य ग्रहस्योच्चादिनिसर्गान्तं षट्प्रकारमानीय तेन बलसमूहेन गुणयेत्। ग्रहद-शायामन्तर्दशायामायव्ययसंख्यासाधने स्याताम्। आभ्यां सर्वग्रहैरानीतां दृष्टिं पृथग्गुणयेत् एते अभिदृष्टिफलप्रदानकाले आयव्ययसाधने स्याताम्।

अथ बलकालायव्ययसाधने उच्येते उच्चराशिमबलमेवोच्चबलं, चेष्टारश्मिबल-मेव चेष्टाबलं तयोर्योगदलं तत्षष्टिगतं साधितमनिष्टफलमिति विभागः। उच्चादि-स्थानेनार्धहोरादिवर्गैश्च युक्तमिष्टफलमनिष्टफलं च स्थानबलेन हत्वा गुरुज्ञार्काणां शतषट्चक्रैः सितचन्द्रयोस्त्रिपापकेन्दुना मन्दभौमयोः षण्णवत्या विभजेत्। स्थान बलकालेष्वायव्ययसाधने भवतः। दिग्बलेन युक्तेष्टानिष्टफले दिग्बलेन हत्वा त्रिंशता विभजेत्। कालबलेनोक्तवत्संयुक्तेऽनिष्टफले इतरमलसंयोगमपि विधाय कालबलेन गुणयेदर्कज्ञाराणां विच्चन्द्रे विभजेत। सितेन्द्वोः शतेन मन्दारयोः सप्तषष्ट्या विभजेत्। कालबलफलकाले आयव्ययसाधने भवतः। एवमयनबलयु-क्तेष्टानिष्टफले अयनबलेन हत्वा सर्वेषामेव त्रिंशता विभजेत्। एवं चेष्टाबलयुक्ते–

"स्थानदिक्कालवीर्यघ्नं चेष्टायनबलाहतम्।

यदुक्तं संख्यया भाज्यं तत्कालायनसाधनम्॥" इति।

पुनः रविरविजगुरवः पञ्चषट्चन्द्रैः सितः शीतगुः कृतिचन्द्रैः शनिभौमौ षण्णवत्या बलिमता दिक्चेष्टायनवीर्ये तु दलमेव प्रकीर्तितम् एकैकशः सप्ताङ्कैः कालबले इति। अथ भावानामिष्टानिष्टफले उच्येते–

भावानां ग्रहवियुक्तानामधिपतिबलमेव फलं ग्रहयुक्तानां तु तस्य ग्रहस्य पाप-शत्रुनीचराशिश्चेदिष्टफलं भावसाधनेन हत्वा षष्ट्या विभजेल्लब्धमिष्टफलमेव प्राक्-

स्थितेऽनिष्टफले योजयेत् । स्थितस्य पापग्रहस्य स भाव उच्चादिपञ्चस्थानं चेद्वि-रोधपरित्यागन्याये प्राक्स्थिते फले भवतः । शत्रुराशिश्चेदुभयं न कर्तव्यमिति सम्प्रदायः । एवमाह यवनेश्वरः-

"भावानां स्वपतेः फले तु विहिते तत्र ग्रहश्चेत्तदा
हत्वा भावफले नवाङ्कभजिते लब्धेषु यो योजयेत् ॥
सौम्यश्चेदितरं रवेः परमथो पापस्तथैवान्यथा ।
दृग्वीर्योत्थफले तथैव च भवेदुच्चादिषूक्तक्रमात् ॥" इति ।

एतदुक्तं तत्राचार्येण भावाध्याये-

"फलमधिकमिदं यदत्र भावाद्भवनभनाथगुणैर्विचिन्तनीयम् ।"

इति वक्ष्यमाणेन ग्रन्थसंदर्भेण सिध्यति । इष्टानिष्टफलानयने कोऽपि सम्प्रदायः प्रदर्शितः । प्रकृतमनुसरामः, संज्ञानुरूपाणि फलानि चैषामित्यस्यायमर्थः राजानौ रविशीतगू इत्यादिना च ग्रहयोरपि भेदाध्याये शिष्टेन ग्रन्थेन च ग्रहमयं समस्त-मित्युक्तम् यथा-

"स्नाय्वस्थ्यसृक्त्वगथ शुक्रवसे च मज्जा
मन्दार्कचन्द्रबुधशुक्रसुरेज्यभौमाः ।"

इत्युक्ते ग्रहाणां धातूनां च सप्तानामभेद उपदिष्टः । तथा सति मन्दस्य स्नायु-धातोश्च भेदे मन्दस्य स्नायुरिति संज्ञा वक्तव्या एवं संज्ञाध्यायोक्तं सर्वमुक्तं संज्ञा-नुरूपाणि फलानीति । तथा चोक्तम् । तत्र यद्ग्रहरूपं यदुक्तं तस्य फलदातृत्वे तत्फ-लपरिपाकः । यथा रवेरात्मप्रभावादि, चन्द्रस्य मनोगुणादि, कुजस्य सत्त्वं, बुधस्य वचनमित्यादि, रविशीतगाविति रविचन्द्रयोः राजकुलवासादि, कुजस्य दण्डनाय-कत्वादबुद्धयादि, बुधस्य यौवराज्यसेवादि, गुरुशुक्रयोरमात्यवृत्तिः, शनेः सेवादि,-प्रागाद्या इत्यत्र दिक्परिज्ञाने फलम् । बुधसूर्यसुतावित्यत्र पुंस्त्रीनपुंसकस्वभावादि. विप्रादित इति जातिभेदपरिज्ञाने, चन्द्रार्कजीवावित्यादि गुणस्वभावपरिज्ञाने, मधु-पिंगलदृगित्यादि रूपपरिज्ञाने, स्नाय्वस्थीत्यादि धातुपरिज्ञाने चोपयुज्यते तदुक्तं 'संज्ञानुरूपाणि फलानि चैषाम्' इति ॥ ६ ॥ ७ ॥

(वैतालीयम्)

उभयेऽधममध्यपूजिता
द्रेष्काणैश्चरभेषु चोत्क्रमात् ।
अशुभेष्टसमाः स्थिरे क्रमा-
द्धोरायाः परिकल्पिता दशा ॥ ८ ॥

उभयेऽधमेति अनेन सूत्रत्रयमपि सूच्यते। उभये चरमध्यमम्, उभये उभयं मध्यमम्, उभये स्थिरं पूजितं, चरभे पूजितमध्यमाधमाः, चरे चरं पूजितं चरे स्थिरं स्थिरं मध्यमं चरे उभयमध्यमम्। अशुभेषु समाः स्थिरे क्रमात्स्थिरे स्थिरम। समये पाक्तिदशायां क्रमादन्त्ये लवदशा शुभेति ॥ ८ ॥

(शार्दूलविक्रीडितम्)

एकं द्वौ नव विंशतिर्धृतिकृती पञ्चाशदेषां क्रमा-
च्चन्द्रारेन्दुजशुक्रजीवदिनकृद्दैवाकरीणां समाः।
स्वैःस्वैः पुष्टफला निसर्गजनितैः पाक्तिर्दशायाः क्रमा-
दंते लग्नदशा शुभेति यवना नेच्छन्ति केचित्तथा ॥ ९ ॥

एकमिति। नैसर्गिकः स्वभावः शरीरिणामेष उक्तः। प्रथमवर्षे चन्द्रोऽधिपतिस्तस्य जलात्मकत्वात्रिश्चेष्टता। द्वितीयतृतीययोर्भौमस्तस्य बालत्वादधिरसाभिरतिर्भवति। चतुर्थवर्षादारभ्य द्वादशवर्षान्तं ज्ञः। त्रयोदशवर्षादारभ्य द्वात्रिंशद्वर्षान्तं दानवपूज्यः। त्रयस्त्रिंशद्वर्षादारभ्य पञ्चाशद्वर्षान्तं गुरुः तस्य ज्ञानस्वरूपत्वाज्ज्ञान-सुखाद्यनुभवः। पुनः सप्तत्यनन्तरं रविरधिपस्तस्य वृद्धत्वादात्मज्ञानसेवाकालः। पुनर्विंशत्युत्तरशतवर्षान्तं शनिरधिपस्तस्य मरणस्वरूपत्वान्मृतप्रायो भवेत्। 'स्वैः स्वैः पुष्टफला निसर्गजनितैः' इत्यनेन बाहुल्याद्यवस्थानुरूपं दशाफलप्राचुर्यं वक्तव्यं भवति। 'स्वैः स्वैः पुष्टफला निसर्गसमये' गणितानीता या निसर्गदशा पुष्टफला वाऽफला वा पुष्टा भवन्ति। प्राचुर्यमस्तीत्यर्थः। तथा च सारावल्याम्—

"स्वोच्चस्वकालबलिनः सम्पूर्णबलस्य या निसर्गयुता।
उत्तमशुभफलदा ग्रहस्य नित्यं दशा भवन्तीति ॥"

एवं चन्द्रादीनां क्रमेणातिबालकुमारयौवनस्थविरविपरीतवृद्धमृतात्मकत्वमनेनोक्तेन दर्शितं भवति ॥ ९ ॥

(शार्दूलविक्रीडितम्)

पाकस्वामिनि लग्नगे सुहृदि वा वर्गेस्य सौम्येऽपि वा
प्रारब्धा शुभदा दशा त्रिदशषड्लाभेषु वा पाकपे।
मित्रोच्चोपचयत्रिकोणमदने पाकेश्वरस्य स्थित-
श्चन्द्रः सत्फलबोधनानि कुरुते पापानि चातोऽन्यथा ॥ १० ॥

पाकेति। दशारिष्टभंगोऽनेनोच्यते। न केवलं जन्मकालादशा निरूपणीया दशा-प्रारम्भकालादपि तत्रापि दशापतेर्गुणदोषवशाच्चिन्त्यते। पाकस्वामिनि दशानाथे

दशाप्रारम्भे लग्नगते सुहृत्क्षेत्रगते दशानाथस्य वर्गे वा शुभर्क्षे सौम्ये वा शुभराशिगते वा या दशा प्रारभ्यते सा शुभा भवति । तथा च सारावल्याम्-

"प्रवेशे बलवान्खेटः शुभैर्वा संनिरीक्षितः ।
सौम्यादिमित्रवर्गस्थस्तदा शुभफलप्रदः ॥"

इत्यादित्रिदशषड्लाभे वा पाकपे उपचयस्थे दशापतौ प्रारब्धाः शुभा दशा इति । अथार्थान्तरमुच्यते-लग्नाद्द्विद्वादशराशिभिर्ये भावा निरूप्यन्ते तेषामधिपाः पाकस्वामिनोऽर्कादयो ये ग्रहाः पित्रादिकारकास्ते च तत्तत्पित्रादिपदार्थपाकस्वामिनः एवं यस्य पदार्थस्य यः पाकस्वामी दशाप्रारम्भे तस्मिन् लग्नगते सुहृत्क्षेत्रगते तस्य वर्गे लग्नगे तद्दशायां तस्य शुभं भवति । मूहूर्त्तादावप्येवम् । तथा चोक्तम्-

"पुत्रादिभावसिद्ध्यर्थं क्रियाः पुंसवनादयः ।
सिद्ध्यन्ति भावनाथस्य वारक्षेत्रोदये कृताः ॥" इति ।

पुनः सौर्यामित्यादिना यानि शुभफलान्युक्तानि तेषां वृद्धिर्भवति, प्रश्नादावप्येवमूह्याः । यः कारको यस्य फलस्य तस्मिन्लग्नगते बन्धुगते वा तस्य वर्गे लग्नगे तस्मिन्स्ववर्गगे सौम्यक्षेत्रगते वोपचयगते वा तस्य फलस्याचिरात्सिद्धिर्वक्तव्या इति । मित्रोच्चोपचय इत्यादि 'चन्द्रः सत्फलबोधनानि कुरुते' इत्यत्र चाभिप्रायान्तरमस्ति चन्द्रस्य हि फलानां बोधयितृत्वं, रवेर्दशाफलानां पाचकत्वं, 'राजानौ रविशीतगू' इत्युक्तत्वाच्चन्द्रार्काधीनत्वं कुजादीनामुक्तं पूर्वमेव व्याख्यातं शास्त्रान्तरे-

सविता दशाफलानां पाचयिता चन्द्रमा प्रबोधयिता ।
आदित्यचन्द्रवशगाः सर्वे ताराग्रहा ज्ञेयाः ॥" इति ।

अकस्मादेकस्यां दशायामुक्तानि शुभफलानि मित्रोच्चोपचयादिस्थानगते चन्द्रेऽनुभूयन्ते मित्रोच्चोपचयादन्यराशिगे चन्द्रे अशुभफलान्यपि भवेयुरिति द्रष्टव्यम् । चन्द्रस्य मित्रोच्चोपचयादिस्थितत्वं दशाप्रारब्धे निरूपणीयम् ॥ १० ॥

(शार्दूलविक्रीडितम्)

प्रारब्धा हिमगौ दशा स्वगृहगे मानार्थसौख्यावहा
कौजे दूषयति स्त्रियं बुधगृहे विद्यासुहृद्वित्तदा ।
दुर्गारण्यपथालये कृषिकरी सिंहे सितर्क्षेऽन्नदा
कुस्त्रीदा मृगकुंभयोर्गुरुगृहे मानार्थसौख्यावहा ॥ ११ ॥

प्रारब्धेति । सर्वत्र चन्द्रस्थितिवशादन्यग्रहाणां फलविभागभेदोऽस्तीति सूच्यते । अंशकाश्रयेऽप्येतदेव फलं वक्तव्यम् । चन्द्रस्य शुभत्वे सति अन्यग्रहाणां शुभत्व

विपरीते विपरीतत्वम्। चन्द्रबलवशादन्येषां स्वफलदानशक्तिरित्युक्तं भवति। तथा च श्रीपतिः-

"अमृतकिरणवीर्याद्वीर्यमाश्रित्य सर्वे
विदधति फलमेते खेचराः साध्वसाधु।
निजनिजविषयेषु व्याप्रियन्ते यथामू-
न्यलमिह मनसेवाधिष्ठितानींद्रियाणि ॥ ११ ॥"

(शार्दूलविक्रीडितम्)

सौर्यौ स्वं नखदन्तचर्मकनकक्रौर्य्याध्वभूपाहवै-
स्तैक्ष्ण्यन्धैर्यमजस्रमुद्यमरतिः ख्यातिः प्रतापोन्नतिः
भार्यापुत्रधनारिशस्त्रहुतभुग्भूपोद्भवा व्यापद-
स्त्यागी पापरतिः स्वभृत्यकलहो हृत्क्रोडपीडामयाः ॥ १२ ॥

सौर्यामिति। सौर्यामित्यादिश्लोकपूर्वार्द्धेन शुभफलान्यपरार्धेनाशुभफलानि गदितानि। भूपाहवैर्धनमिति पूर्वार्धेनोक्तम्। 'शस्त्रहुतभुग्भूपोद्भवा व्यापदः' इत्यपरार्धेनोक्तम्। भूपाद्धनसिद्धिरपि भूपादापच्च कथमेतत्संभवत्युच्यते-सूर्यस्य बलपुष्टौ पूर्वार्धेनोक्तं शुभफलम्। तथा च सारावल्याम्-

"भानुदशायां लभते नखदन्तचर्मापणाद्यविषकलहैः।
अर्थागैरिव वह्निः क्रौर्यं नरेन्द्रहृदयाद्यैः ॥
चेन्नृपतेरर्थाप्तिर्धैर्यं भूपात्ततोद्यमं तैक्ष्ण्यम्।
ख्यातिः प्रतापविद्याचेष्टा धर्मं द्विभूपतित्वं च ॥
भृत्यार्थचौरचक्षुःशस्त्राण्युदराक्षितिपरा बाधा।
अथ पत्नीबन्धुजनैः संपीडा स्याच्च पापरतिः॥
क्षुत्तृष्णार्तिः शोको हृत्पीडा पैत्तिका रोगाः।
गात्रच्छेदो भवति हि सूर्यदशायामनिष्टायाम् ॥" इति।

एवं सर्वग्रहदशायां यस्य ग्रहस्य शुभफलत्वमुक्तं तस्मिन्बलवति तद्भवति। बलहीने शुभं भवति। मध्यबले मिश्रमिति। एतद्दशासु शस्तास्वित्यादिग्रन्थेनाचार्येणैवोक्तं भवति। नन्वाचार्येणोक्तेभ्यो दशाफलेभ्योऽतिरिक्तानि दशाफलानि। तत्राचार्योक्तान्येव वक्तव्यानि, आहोस्वित्सारावल्यामुक्तान्युच्यन्ते निरूपणे तु सारावल्यामुक्तान्याचार्येणाप्युक्तानि भवन्ति। अत्रौषधविषाभ्यामर्थसिद्धिराचार्येणाप्युक्ता भवति। 'अर्काशे तृणकनकोर्णभेषजाद्यैः' इत्यत्र भेषजेनार्थसिद्धिरुक्ता। 'भार्यापुत्रधनारिशस्त्र०' इत्यत्रारिशब्देन विषचौरादयोऽपि गृह्यन्ते। शस्त्रशब्देन गात्रच्छेदोऽपि

सूचित इत्यादि निरूप्यताम् । प्रश्नादावपि दुस्थे रवौ अशुभान्युक्तानि दशाफलानि वक्तव्यानि सुस्थे तु शुभानि वक्तव्यानि । कालात्मा दिनकृदित्यादि सत्त्वादिगुणविषयः । मधुपिंगलदृगित्यस्याकृतिविषयः । स्नाय्वस्थीत्यादि धातुविषयः । देवाग्न्यित्यादि स्थानविषयः । वस्त्रं स्थूलमित्यादि वस्त्रविषयः । दिवाकरेन्द्वोरित्यादि पितृमातृनिरूपणविषयः । व्ययगृहगतश्चन्द्रो वामं हिनस्तीत्यादिना नयनारोग्यादि । सूर्ये काष्ठचतुष्पदेत्यादिना देह पीडादि पित्तप्रकृतिरित्यादिना धातुकीयः । योऽग्न्यधिपतित्वाज्ज्वरादिभयमग्निभयमग्निशस्त्रविषयं च दाहादि । अस्थ्यधिपतित्वादस्थिस्नायुहृत्क्रोडपीडामयाः । शिवदैवत्य शिवकोपः । सिंहराश्यधिपतित्वादपस्मार इत्यादि सर्वं प्रश्ने विचिन्तनीयम् ॥१२॥

(शार्दूलविक्रीडितम्)

इन्दोः प्राप्य दशां फलानि लभते मंत्रद्विजात्युद्भवा-
नीक्षुक्षीरविकारवस्त्रकुसुमक्रीडातिलान्नश्रमैः ।
निद्रालस्यमृदुद्विजामररतिः स्त्रीजन्म मेधाविता
कीर्त्यर्थोपचयक्षयौ च बलिभिर्वैरं स्वपक्षेण च ॥ १३ ॥

इन्दोरिति । क्षीरशब्देन जलं चोच्यते—कीर्त्यर्थोपचयक्षयौ पक्षवशादन्यस्सूर्यवशात् ॥ १३ ॥

(शार्दूलविक्रीडितम्)

भौमस्यारिविमर्दभूपसहजक्षित्याविकाजैर्धनं
प्रद्वेषस्सुतदारमित्रसहजैर्विद्वद्गुरुद्वेष्टृता ।
तृष्णासृग्ज्वरपित्तभङ्गजनिता रोगाः परस्त्रीकृता
प्रीतिः पापरतैरधर्मनिरतिः पारुष्यतैक्ष्ण्यानि च ॥ १४ ॥

भौमस्येति । भौमस्यारिविमर्दभूपसहजक्षित्याविकादीनां कारकत्वं चोक्तम् । मेषाधिपत्याच्छिरोरोगः । अग्निमयत्वान्नयनरोगः । अग्निशस्त्रविषयम् । पित्तशब्देनापस्मारभ्रान्त्यादि सूचितम् । भङ्गशब्देन च विकटाद्यपि सूचितम् । अरिशब्देन चौरोपि सूचितः । एतेषु दशाग्रहेषु बलवत्सु यैर्हेतुभिर्धनसिद्धिरुक्ता प्रतिकूलस्थानगतेष्वबलेषु तैर्हानिरपि तर्कणीया ॥ १४ ॥

(शार्दूलविक्रीडितम्)

बौध्यां दौत्यसुहृद्गुरुद्विजधनं विद्वत्प्रशंसायशो-
युक्तिद्रव्यसुवर्णवेसरमहीसौभाग्यसौख्याप्तयः ।

हास्योपासनकौशलं मतिचयो धर्मक्रियासिद्धयः

पारुष्यं श्रमबन्धमानसशुचः पीडा च धातुक्षयात् ॥ १५॥

बौद्ध्यामिति । यथा सवितृदशानिरूपणप्रकार उक्तस्तद्वत्सर्वेषामपि निरूपणीयः । दौत्यसुहृदित्यादिनोक्तः ॥ १५ ॥

(शार्दूलविक्रीडितम्)

जैव्याम्मानगुणोदयो मतिचयः कांतिप्रतापोन्नति-

र्माहात्म्योद्यममन्त्रनीतिनृपतिस्वाध्यायमन्त्रैर्धनम् ।

हेमाश्वात्मजकुञ्जराम्बरचयः प्रीतिश्च सद्भूमिपैः

सूक्ष्म्योहागहनाश्रमः श्रवणरुग्वैरं विधर्माश्रितैः ॥ १६ ॥

जैव्यामिति । हेमाश्वात्मजादीनामतिशयस्यापि गुरोः कारकत्वं ज्ञेयम् ॥ १६ ॥

(शार्दूलविक्रीडितम्)

शौक्र्याङ्गीतरतिप्रमोदसुरभिद्रव्यान्नपानाम्बर-

स्त्रीरत्नद्युतिमन्मथोपकरणज्ञानेष्टमित्रागमाः ।

कौशल्यं क्रयविक्रये कृषिनिधिप्राप्तिर्धनस्यागमो

वृन्दोर्वीशनिषादधर्मरहितैर्वैरं शुचः स्नेहतः ॥ १७॥

शौक्र्यामिति । गीतादीनां शुक्रस्य कारकत्वमवगन्तव्यं विवाहोपि मन्मथोपकरणशब्देनोक्तः ॥ ॥ १७ ॥ ॥

(शार्दूलविक्रीडितम्)

सौरीम्प्राप्य खरोष्ट्रपक्षिमहिषीवृद्धाङ्गनावाप्तयः

श्रेणीग्रामपुराधिकारजनिता पूजा कुधान्यागमः ।

श्लेष्मेर्ष्यानिलकोपमोहमलिनव्यापत्तितन्द्राश्रमा-

न्भृत्यापत्यकलत्रभर्त्सनमपि प्राप्नोति च व्यङ्गताम् ॥ १८ ॥

सौरीमिति । सौर्यां स्वमित्यादिसप्तश्लोकोक्तं प्रश्नादावप्युपयुज्यते ॥ ॥ १८ ॥

(उपजातिः)

दशासु शस्तासु शुभानि कुर्व-

न्त्यनिष्टसंज्ञास्त्वशुभानि चैवम् ।

मिश्रासु मिश्राणि दशाफलानि
होराफलं लग्नपतेस्समानम् ॥ १९ ॥

दशास्विति । बलाबलवशाद्दशानां शस्ताशस्तत्वं चोक्तम् । समबलिनः स्वतुङ्गे सम्पूर्णेत्यादिनोक्ताः संज्ञाः स्वतुङ्गभागे स्थितस्य सम्यग्बलिन इत्युक्तत्वात्स्थानबलेन तुङ्गाश्रयेणान्यैर्दिक्कालचेष्टादिभिर्बलैरसितस्येत्युक्तं भवति । तस्माद्बलवद्दशायाः कष्टत्वमिष्टत्वं चोच्यते । तथा चोक्तम्-

"सम्पूर्णवीर्यः सविता करोति राज्यादिसिद्धिं जनरञ्जनादीन् ।
पादोनवीर्येण युतोऽस्य पुष्टिं गृहीयवस्तुस्वजनाभिवृद्धिम् ॥
वीर्यार्धयुक्तो विपदाभिभूतिं पश्चात्सुखार्तिं सुतदारसौख्यम् ।
पादेन वीर्येण युतोऽपि दुःखं व्याध्यादिकोपं शमनं च पश्चात् ॥
षड्भागवीर्यःस्वसुतार्तिदुःखं मूर्धागरोगं पिटकं च पश्चात् ।
इष्टासु हानिं त्वथ षोडशांशवीर्योऽतिदुःखं मरणं बलोनः ॥
चान्द्रीदशा पुष्टफलं ददाति स्त्रीराज्यवस्त्रान्नसुगन्धबन्धून् ।
पादोनजा स्त्रीग्रहणं जलात्तु धनं कफार्तिं निजमातृसौख्यम् ॥
अर्धांशजा स्त्रीकलहं सुगन्धद्रव्यान्नपानादतिभीर्विरोधम् ।
स्त्रीभ्यो धनं पित्तमरुत्प्रकोपं यो षोडशांशाज्जलतोऽर्थहानिम् ॥
वृद्धाङ्गनासक्तिवधूविनाशौ वीर्यैर्वियुक्तौ विषबन्धघातम् ।
स्त्रीभीतिपाथोमयपाण्डुरोगान्निरुन्नतामात्मजनैर्वियोगम् ॥
देहक्षयं वा प्रददात्यनिष्टां सम्पूर्णवीर्यस्य कुजस्य दोषम् ।
भूपुत्रसेनाधिपतित्वलाभं पूजा गुरूणां गुणवान्धनाढ्यः ॥
शूलं भवेत्पित्तमरुत्प्रकोपात्पादोनवीर्यः प्रददाति राज्यम् ।
सर्वैर्विरोधं कलहं वधूभिर्वीर्यार्धयुक्तो धनयुक्तदाराः ॥
विपक्षवैरं च कुजः करोति अर्थव्ययाद्व्रणपित्तकोपान् ।
द्विजातिरोषात्पदवीर्ययुक्ताः षड्भागवीर्या वसनार्थहानिम् ॥
स्त्रीपुत्रदारास्यगदप्रदाता कुष्ठाक्षिकर्णोद्भवरोगपीडाः ।
शत्रुक्षतिं स्वल्पबलः करोति विहीनवीर्यो मरणप्रदः स्यात् ॥"

'शस्त्राभिभूताशनितो भयं च'इत्यादिवद्बलवशात्सौर्यां स्वमित्यादिनोक्तानि फलानि विभज्य जातिकुलदेशावस्थानुरूपं वदेत् । ननु च बलवशादेव केवलं सर्वेषां ग्रहाणां शुभाशुभत्वमिति चेच्छुभानां शुभकृत्त्वमशुभानामशुभकृत्त्वं च कथं संपद्यते । उच्यते मन्दस्य तु श्लोकस्य पूर्वार्धेनाधारशुभफलमुक्तमपरार्धेनात्यन्तमशुभफलमुक्तम् । तस्मादेषां त्रयाणां दशासु शुभफलमित्युक्तं भवति । बुधस्य दशाफलोक्तिस्त्रिभिः

पादैः शुभफलमुक्तमन्त्यपादेनाशुभफलमुक्तम्। गुरुदशायां प्रायशः शुभफलान्येवोक्तानि। अन्यैस्तु किंचिदशुभफलमुक्तम्। शुक्रस्यापि तद्वत्। तस्मादेषां त्रयाणां शस्तासु दशासु शुभफलानि वस्तूनि प्रायो भवन्ति। अनिष्टसंज्ञासु अशुभमल्पं शुभं न भवति। चन्द्रस्याप्येवं चिन्त्यम्। इयानत्र विशेषोऽभिप्रेतः। पुनरष्टमाधिपत्यादिदोषकृत्त्वं सर्वग्रहाणां साधारणमेव तत्रापि बलं चिन्त्यम्। अथ प्रश्नादौ दशासु शस्तासु शुभानि कुर्वन्ति। अवस्थासु मङ्गलासु च प्रच्छकस्य शुभानि भवन्ति अनिष्टसंज्ञास्ववस्थास्वशुभानि भवन्तीति। 'होराफलं लग्नपतेः समानं' होराफलं जातकफलं समस्तं लग्नेशसमानं, लग्नेशस्य प्रभावादावारूढेशस्य बलं विशेषाच्चिन्त्यमित्यर्थः ॥ १९ ॥

(शालिनी)

संज्ञाध्याये यस्य यद्द्रव्यमुक्तं
कर्म्माजीवो यश्च यस्योपदिष्टः।
भावस्थानालोकयोगोद्भवश्च
तत्तत्सर्वं तस्य योज्यं दशायाम् ॥ २० ॥

संज्ञेति। अत्र दशाफलनिरूपणे न केवलं सौर्यां स्वमिति उक्तफलान्येव वक्तव्यानि। किन्तु बहुधा हि ग्रहस्य फलपरिपाकदशावशादन्तर्दशावशाद्राशिवशाद्योगवशादष्टकवर्गवशाद्द्रेष्काणादिवशादाश्रयवशाच्च यद्यत्फलं तत्सर्वं दशासु योज्यम्। 'संज्ञाध्याये यस्य यद्द्रव्यमुक्तं' इत्यत्र संज्ञाध्याये कालात्मा दिनकृदित्यादिग्रन्थेन यः पदार्थ उक्तः सोऽनुसन्धेयः। आदित्यादीनामात्मत्वराजत्वादि रक्तश्यामत्वादि च ताम्रादिवर्णाः पदार्थाश्च ताम्राणि द्रव्याणि च सत्त्वादिगुणाश्च विप्रादिजातयश्चान्योन्यविधानि ग्रहस्वरूपाण्युक्तानि तानि सर्वाणि दशासु योज्यानि। एतदुक्तं भवति। आदित्ये बलवति सति जातस्यादित्यदशायामात्मप्रभावः राजप्रसादस्ताम्रवर्णवस्तुसिद्धिस्ताम्रद्रव्यलाभः क्षत्रियकुलवासः सत्त्वगुणस्वभावः। 'मधुपिंगलदृक्' इत्यादि आकृतिस्थितिधातुपुष्टिः। आदित्ये बलहीने सति एतेषां हानिरपि चिन्तनीया। एवं चन्द्रादीनामपि स्वस्वरूपानुरूपमूह्यम्। योज्यमित्यत्र जातिवशादवस्थानुरूपं योजनीयमित्यर्थः। अथवा शास्त्रान्तरेषु ग्रहाणां द्रव्याण्युक्तानि तस्यार्के तनुस्थे इति लग्नेऽर्कस्य फलमुक्तं तत्र शूरशब्देन क्रियालस्यं क्रोधिता प्रचण्डत्वं मानित्वं पित्तप्रकृतित्वात्पैत्तिकत्वमल्पकफं च निरूपणीयं न केवलमेतावता 'समुपचयविपत्तिः सौम्यपापेषु सत्यः कथयति विपरीतं रिःफषष्ठाष्टमेषु' मूर्त्यादिभावेषु यत्र सौम्यास्तस्य भावस्योपचयं यत्र पापस्तस्य भावस्य

विपरीतं रिःफषष्ठाष्टमेषु शुभोपि नाशं करोति अष्टमे शुभो मरणं नाशं करोति षष्ठे शुभो रिपुनाशं करोति पापो विपरीतमिति सत्यः कथयति। आचार्यस्य मतं तु अष्टमव्ययपयोः सर्वे नेष्टाः षष्ठे शुभाः शत्रुनाशका इति कथमेतदवगतमिति चेदष्टमे गुरोर्नीच इति फलमुक्तं द्वादशे गुरोः खल इति षष्ठे गुरोरशुभ इति। शुक्रस्य गुरुवदित्युक्तम्। अष्टमे रवेः-'स्वल्पात्मजो निधनगे विकलेक्षणश्च' इत्युक्तम्। 'व्यये पतितस्तु रिःफे' इति कुजशन्योरादित्यवदित्युक्तम्। तस्मादष्टमद्वादशयोः सर्वे ग्रहा नेष्टा इति सिद्धं भवति। 'अन्त्यगते द्रविणीयः स्यात्' इत्युक्तत्वाच्छुक्रं विना सर्वे ग्रहाः मृत्युव्ययर्योर्नेष्टा इत्यवगन्तव्यम्। तथा च स्वल्पजातके-

"पुष्णन्ति शुभा भावान्मूर्त्यादीन् घ्नन्ति संस्थिताः पापाः।
सौम्याः षष्ठेऽरिघ्नाः सर्वे नेष्टा व्ययाष्टमगाः॥" इति।

एतानि दशायां योजनीयानि। तानि शास्त्रान्तरादानीय लिख्यन्ते तथाच सारावल्याम्-

"व्यालाग्निशैलकर्णिकसुवर्णविषवस्त्रभेषजादीनाम्।
म्लेच्छास्थिकारकाणां गिरिकाष्ठादेः प्रभुः सूर्यः॥
कुसुमानां भोज्यानां मणिरजतेक्ष्वादिशङ्खवस्त्राणाम्।
रम्यविभूषणनारीघृततैलादिप्रभुश्चन्द्रः॥
रक्तोत्पलताम्राणां मनःशिलास्वर्णपात्राणाम्।
क्षितिनृपपतितनुमूर्च्छाभिघातचौरप्रभुर्भौमः॥
श्रुतिलिपिशिल्पकलादौ सुनिपुणता मन्त्रिदूतप्रभुहास्ये।
खगयुग्मादौ ख्यातिर्विविधौषधिमणिप्रभुः सौम्यः॥
माङ्गल्यधर्मपौष्टिकमहत्त्वाशिक्षादियागपुरराष्ट्रे।
यानासनधान्यादेः सुवेश्मपुत्रप्रभुर्जीवः॥
वस्त्रमणिरत्नभूषणविवाहरम्येष्टगन्धमाल्यानाम्।
सुयुवतिनिधुवनविद्यासखित्वरजतप्रभुः शुक्रः॥
त्रपुशीसकाललौहककुधान्यमदमृतिदैन्यबन्धादेः।
व्याधीनामति वृद्धिः सुदीनदीक्षाप्रभुः सौरिः॥"

एवं ग्रहाणां द्रव्यमुक्तं कर्मजीवफलं शूरस्तब्ध इत्यादिवृत्तानां ताम्रदृगित्यादिस्थानबलं चन्द्रे रूपबुधावित्यादि दृष्टिफलं राजयोगचन्द्रयोगद्विग्रहयोगप्रव्रज्यायोगारिष्टयोगनिर्याणयोगाश्रययोगाद्भावफं सर्वं दशासु योज्यम्। तत्र भावफलाध्याये स्वल्पं सत्फलमुक्तम्। तथाहि-

'शूरस्तब्धो विकलनयनो निर्घृणोऽर्के तनुस्थे।'

सर्वदा सर्वाणि वाच्यानि तत्र विभागोस्ति। तदुच्यते-

"सुहृदरिपरकीयस्वर्क्षतुंगस्थितानां फलमनुपरिचिन्त्यं लग्नदेहादिभावैः।"
अनुपरिचिन्त्यं फलदग्रहबलपुष्टिः किन्तु-
फलमधिकमिदं यदत्र भावाद्भवनभनाथगुणैर्विचिन्तनीयम्॥"

भावराशेर्भावाधिपस्य च भावस्थग्रहस्य च बलाधिक्याद्भावफलमधिकं भवति। सुहृदरिपरकीयस्वर्क्षतुंगस्थितानां फलं कथमनुपरिचिन्त्यमिति चेत्तदर्थमुक्तम्-

"उच्चत्रिकोणस्वसुहृच्छत्रुनीचगृहार्कगैः।
शुभसंपूर्णपादोनदलपादाल्पनिष्फलम्॥" इति।

तथा चोक्तमन्यत्र-

"स्वोच्चे प्रदीप्तः सुखिनस्त्रिकोणे स्वस्थः स्वगेहे मुदितः सुहृद्भे।
शान्तस्तु सौम्यग्रहवर्गसंस्थः शक्तो मतोसौ स्फुटरश्मिजालः॥"
ग्रहाभिभूतः स निपीडितः स्यात्खलस्तु पापग्रहवर्गसंस्थः।
सुदुःखितः शत्रुगृहे ग्रहेन्द्रो नीचेतिभीतो विकलोऽस्तयातः॥"
"दीप्तः पूर्णं विधत्ते शुभफलमुदितः पादहीनस्तदस्तः
स्वस्थः पादैर्विहीनं त्रिभिरथ मुदितः शान्तशक्तौ च तद्वत्।
अत्यल्पं तत्र योन्ये विदधति विकलो भीतसंज्ञश्च कष्टम्
भीतायादीप्तनिष्टास्त्वशुभमपि तथा व्युत्क्रमेण ग्रहास्ते॥"

तस्माद्भावाधिपतिबलमाश्रित्य राशिबलं चावलोक्य फलं वक्तव्यम्। तथा चोक्तम्-

"अधिपः सर्वभावानां कारकः परिकीर्तितः।
कर्ता भावगतः प्रोक्तस्तथा तद्भाववीक्षितः॥
बलहीनेऽरिनीचस्थे दुःस्थे वा भावनायके।
भावस्य सम्पदं कर्तुं न शक्यं भावमाश्रितैः॥"

लग्नाद्द्विर्द्वादशभावानां स्वाधिपतिना सौम्यग्रहैश्च योगसंभवे सति वृद्धिर्भवति शत्रुग्रहैः पापैरपि दृष्टियोगसंभवे हानिर्भवति। तथा च षट्पञ्चाशिकायाम्-

"यो यो भावः स्वामिदृष्टो युतो वा
सौम्यैर्वा स्यात्तस्य तस्यास्ति वृद्धिः।
पापैरेवं तस्य भावस्य हानि-
र्निर्देष्टव्या पृच्छतां जन्मतो वा॥"

आचार्येणाप्युक्तमनिष्टयोगाध्यायेऽयमर्थः प्रोक्तस्तथा तत्प्रकारः-

"लग्नात्पुत्रकलत्रभे शुभपतिप्राप्तेऽथवालोकिते।
चन्द्राद्वा यदि सम्पदस्ति हि तयोर्ज्ञेयोऽन्यथा संभवः॥"

अयं विधिर्न केवलं पुत्रकलत्रविषयः सर्वभावसाधारणः स्यात्। बह्वर्थोऽयं श्लोकः पुत्रकलत्रभे शुभपतिप्राप्ते शुभैः पत्या वा प्राप्ते एतैरालोकिते वा तयोः सम्पदस्ति यद्वा शुभानां पती शुभपती शुभप्रवरौ गुरुशुक्रावित्यर्थः गुरुशुक्राभ्यां पुत्रकलत्रभे प्राप्तेऽथवालोकिते वा यदि तयोः सम्पदस्ति, अथवा शुभपतिः शुभं भवनं भाग्यस्थानं तत्पतिः प्राप्तावलोकिते पुत्रकलत्रभे यदि तयोः सम्पदस्ति अर्थाद्-शुभपतिप्राप्तावलोकिते पुत्रकलत्रभे यदि तयोरभावो ज्ञेयः अन्यथा सम्भव इति-वचनादशुभमष्टमं मरणस्थानत्वात्पतिरष्टमेशस्तेन युतदृष्टो भावो नाशं व्रजति। तथा चोक्तम्-

"यद्भावस्थोऽष्टमपस्तद्भावो नश्यते न सन्देहः।" इति।

लग्नस्य लग्नेशस्य वा पुत्रकलत्रेशयोगदृष्टो तत्संभव इति। एवं भावयोगबलादा-श्रयबलात्सुहृत्सौम्यवीक्षणादन्यथा भवति। तथा च सारावल्याम्-

"योगाश्रयबलयोगात्सौम्यादिपुनिरीक्षणाच्चैव।
उच्चादिभवनसंस्थैर्ग्रहैश्च फलमन्यथा भवति॥" इति।

चन्द्राद्वेति। चन्द्रस्य बलिष्ठत्वे तस्मात्फलसिद्धिः। अत्र ग्रहाणां कारकत्व-मस्ति। तथा चोक्तम्-

"आत्मप्रभावशक्तिश्च पितृचिन्ता रवेः फलम्।
मनोबुद्धिप्रभावं च मातृचिन्ता तु चन्द्रतः॥
भ्रातृसत्त्वगुणान्भूमिं भौमेन तु विचिन्तयेत्।
वाक्प्रगल्भं च विज्ञानं बुधेन परिचिन्तयेत्॥
गुरुणा देहपुष्टिः स्याद्बुद्धिपुत्रार्थसंपदः।
शुक्राद्विवाहकर्म स्याद्भोगस्थानं च वाहनम्॥
आयासव्याधिदुःखानि मरणं च शनैश्चरात्।"

एतदस्मिन्नेव पूर्वोक्तेन सिद्ध्यति कथमिति चेत्कालात्मा दिनकृदित्यादिना श्लोकार्धेन दिवार्कशुक्रावित्यादिना च सह क्षित्याविकाजैर्धनमित्यनेन च हेमाश्वात्म-जकुञ्जराम्बरचय इत्यनेन च विज्ञातव्यमिति उग्रग्रहैरित्यनेन श्लोकेन शुक्रस्य भार्या-कारकत्वं पूर्वं च सिद्धिश्च मदन इति बीजक्षेपः। शौर्यं गीतरतीत्यनेन निवृत्तम्। एवमुग्रग्रहैरित्यनेन भार्यारिष्टम्। सप्तमाधिपतेरप्येवमूह्यम्। गुरोः पञ्चमाधिपते-श्चैतत्पुत्रारिष्टत्वमवगन्तव्यम्। पुंस्त्रीविभागस्तु बुधसूर्यसुतावित्यनेन श्लोकेन निरूप-यितव्यः। बुधशन्योर्नपुंसकत्वे तद्वर्गे तत्सम्बन्धे तदादिसिद्धिः एतेषां ग्रहाणां वर्गे वित्तादिसिद्धिः। पुत्राणां संख्या दृष्ट्या समानं प्रवदेदित्यादिना ज्ञेया। अथ

'लग्नाद्युपारिगतयोः' इति येन कारकत्वं चन्द्रार्कयोः। 'द्यूनस्थयोर्नवमपंचमसंस्थयोर्वा शुक्रार्कयोः' इत्यत्रार्कशब्देनांगारकोऽपि गृह्यते। तथा च सारावल्याम्—

"द्यूने कुजभार्गवयोर्जातः पुरुषो भवेद्विकलदारः।
धीधर्मास्थितयोर्वा नो विकलं पण्डिताः प्राहुः॥"

इत्यरिष्टयोगाध्यायोक्तमपि दशायां योज्यम्। अथ स्थानशब्दस्यार्थ उच्यते। वृत्ताताम्रदृगित्यत्राध्यायोक्तफलराशितन्नाथस्वभावा अत्रोच्यन्ते। वृत्ताताम्रदृगिति कुजधर्मः। उष्णशाकलघुभुगिति मेषधर्मः। क्षिप्रप्रसादः सेनाधिपधर्मः। अटनः कामी दुर्बलजानुरंगनावल्लभः कुनखी व्रणाङ्कितशिरास्तोये च भीरुरिति मेषधर्मः। अन्ये सेनापतिधर्माः। एवं चन्द्रस्य अन्येषु राशिषूक्तं फलमपि। अन्येषां राशिफलानि तन्नाथस्वभावा इत्यवगन्तव्याः। तेन राशौ बलवति तदधिपे च बलसहिते युक्तग्रहे च बलवति कथितफलानां समग्रप्राप्तिः, राशौ बलहीने उभयमपि न वाच्यम्। ग्रहे च बलहीने तथैव तदुक्तमाचार्येण—

"बलवति राशौ तदधिपतौ च स्वबलयुतः स्याद्यदि तुहिनांशुः।
कथितफलानामविकलदाता शशिवदतोऽन्येप्यनुपरिचिन्त्याः॥"

एतत्स्थानबलमपि दशायां योज्यमिति। आलोकनशब्दस्यार्थ उच्यते। चन्द्रे भूपबुधावित्यादिना मेषाद्येकैकराशिगतस्य चन्द्रस्यान्यग्रहवीक्षणफलान्युक्तानि तथा मेषाद्यंशगतस्य चन्द्रस्यापि तान्युक्तानि पूर्वशास्त्रेषु विस्तरतः कथितानि। इह तु संक्षेपादेकैकं फलमेव कथितं तेनापि शुभाशुभविभागो विज्ञायते। ततः पूर्वशास्त्रैरप्यवगन्तव्यानि चन्द्रस्य तावत्—

"शिशिरकरसमागमेक्षणानां कथितफलं प्रवदन्ति लग्नजातम्॥"

'भेन्द्वर्कास्पदपतिगांशनाथवृत्त्या' इति च वक्ष्यति। 'उदयरविशशाङ्कप्राणिकेन्द्रादिसंस्थाः' इत्युक्तं च पूर्वं तस्माल्लग्नचन्द्रार्काणां जातकफलनिरूपणे प्रधानोपकारित्वमिति ज्ञायते। अन्येषां ग्रहाणां च प्रतिराशिदृष्टिफलमस्ति तत्पूर्वशास्त्रेषु कथितं च कालात्मा दिनकृदितिश्लोकरूपेण सूत्रेण वीक्ष्यमाणग्रहं च तदाश्रितराशिं च वीक्ष्य ग्रहं च निरीक्ष्य तेषां दृष्टिफलं स्वबुद्ध्या तर्कणीयम्। पूर्वशास्त्राणि चावगम्य तत्फलं निर्णतव्यम्। चन्द्रस्यांशवीक्षणस्य इयान्विशेषः—

"वर्गोत्तमः स्वपरगेषु शुभं यदुक्तं
तत्पुष्टमध्यलघुताशुभमुत्क्रमेण"

इत्युक्तमंशकफलं निरूपणीयमिति सूचनार्थमेवंभूतं दृष्टिफलमपि स्वदशायां योज्यम्। अथ योगशब्दस्यार्थ उच्यते तत्र प्रथमं राजयोगा उक्ताः 'प्राहुर्यवना' इत्यादिना 'त्रिभिरुच्चगतैः क्रूरैरपि महीपतिर्भवति' इति। 'स्वोच्चेषु षोडशनृपा' इति फलभेदोऽस्ति अतो योगानां विभागेन संख्याकरणम्—

"अपि खलु कुलजाता मानवा राज्यभाजः" इत्यादिश्लोकेन कानिचित्फलानि जातिदेशावस्थानुरूपं वक्तव्यानि कानिचिदवश्यंभवितव्यतया वक्तव्यानि तद्विभागो लक्षणानां बलाबलविभागत इति सूचितम् । राजयोगस्य ग्रहस्यातिबलं तद्दशायां राज्यप्राप्तिस्तदुपरि वक्ष्यति-

"कर्मलग्नगतपाकदशायां राज्यलब्धिरथवा प्रबलस्य ।
शत्रुनीचग्रहयातदशायां छिद्रसंश्रयगता परिकल्प्या ॥"

दशमगतस्य दशायां राज्यप्राप्तिं वदेत्—तथा चोक्तम्-

"बलयुक्तो दशमगतस्तस्य दशायां विनिर्दिशेद्राज्यम् ।
तत्रोच्चे वर्गगतो यदि स तु संपूर्णभूमिभाग्भवति ॥
उच्चस्थो बलयुक्तः सौम्यः सौमेन शोभनेन युतः ।
तस्य दशायां राज्यं प्राप्नोत्यन्तर्दशायां च ॥
जन्मसमये ग्रहेन्द्रा बहुफलयुक्तास्तथा सुस्थाः ।
तेषां दशासु मतिमान्संपत्तिं निर्दिशेद्यथायोग्यम् ॥
अन्यांश्च राजयोगानालोच्य बलाधिकस्य वर्षेषु ।
राज्यं ब्रूयान्मतिमान्कारकविहगस्य पाके वा ॥
नीचेऽस्तगेऽरिराशौ रन्ध्रे व्ययभेऽथवा बलैर्हीने ।
तस्य दशायां भ्रंशं विनिर्दिशेद्बन्धनं चापि ॥"

इति राजयोगाश्चिन्त्याः । एतेषां राजयोगानां भंगोपि निरूपणीय इति अन्येषु शास्त्रेषु विस्तरतोऽन्यैराचार्यैर्निर्दिष्टः । आचार्येण राजयोगोक्तप्रकारवैपरीत्येन चिन्त-नीय इति नोक्तः । 'प्राहुर्यवनाः स्वतुंगगैः क्रूरैः' इत्यत्र स्वनीचगैः क्रूरैरितिवैपरीत्येन राजयोगभंगः । तथा च सारावल्याम्-'सर्वे क्रूराः केन्द्रे नीचारिगताः न सौम्ययुत-दृष्टाः । शुभदा व्ययरिपुरन्ध्रैस्तदा विभंगो भवेन्नृपतेः ।' इति ननु केवलं 'प्राहुर्यवनाः स्वतुंगगैः क्रूरैः' इत्यस्य वैपरीत्यमेवात्रोक्तं तेषां क्रूराणां केन्द्रगतत्वं सौम्यग्रहाणां दृष्टयुतत्वं च शुभानां व्ययरिपुरन्ध्रगतत्वं चोपकारितयोक्तं कथमेतदवगम्यते । उच्यतेऽवगमोपायः क्रूराणामवगतत्वं योगवैपरीत्येन केन्द्रगतत्वं 'स्रक्सर्पौ कथितौ पराशरेण' इत्यत्र सर्पयोगलक्षणेन सौम्यायुतदृष्टित्वम् । 'अशुभगदिता योगा याप्या भवन्ति शुभेक्षिताः' । इत्यनेन तर्कणीयम् । वक्रार्कजार्कगुरुभिरित्यत्रापि वैपरीत्येन राजयोगावगमः । तथा च सारावल्याम्-

"कुजार्कजीवार्किभिरत्र नीचे द्वाभ्यां त्रिभिर्वा कतमे विलग्ने ।
निशाकरे वृश्चिकराशिसंस्थे वंशीयुते राजककोऽतियोगः ॥"

इति वर्गोत्तमगते लग्न इत्यत्रापि वैपरीत्यं ग्राह्यम् । तथा च सारावल्याम्-

"लग्नं गणोत्तमारूपं न खेचरैर्दृश्यते यदा भङ्गः।
भवति हि नृपयोगानां दारिद्र्याय प्रजातस्य॥
अष्टमस्यादिभागे राश्यादिषु वा शशी यदा क्षीणः।
एकेनापि न दृष्टो शुभेन भंगस्तदा नृपतेः॥"

'स्वोच्चत्रिकोणगैर्बलसंस्थैः' इत्यत्रापि वैपरीत्यमवगन्तव्यम्। तथा च सारावल्याम्—

"घटोदये नीचगतैस्त्रिभिर्ग्रहैर्बृहस्पतौ बन्धुगते च नीचगे।
एकोपि नोच्चेऽप्यशुभस्य भंगः प्रयान्ति नाशं शतशो नृपोद्भवाः॥"

इत्यादिशास्त्रान्तरादवगन्तव्यम् ऊहशक्तिरस्ति चेदस्मादेवावगन्तव्यम्। राजयोगसम्भवे उत्पातानां बाहुल्ये सति राजयोगभंगः। तथा च सारावल्याम्—

"उल्कायाः पतने चैव निर्घातव्यतिपातयोः।
केतोश्च दर्शने चैव यान्ति नाशं नृपात्मजाः॥
अन्यैः क्रूरोत्पातैस्त्रिशंकुपातोदयाद्यैश्च।
सद्यः प्रयाति नृपतेर्योगो यदि भानुजो रवेर्लग्ने॥
कर्तारो नृपतीनां यदि वै युद्धस्य कांक्षिणो बलिनः।
क्रूरैर्विजीर्णदेहा विघ्नं जनयन्ति राजयोगस्य॥"

इत्यादिग्रहाणां नीचगतत्वं विशेषतश्चिन्तनीयम् इयानत्र विशेषोऽभिमतः ग्रहाणामुच्चत्रिकोणक्षेत्रांशगतत्वं वक्रगतत्वं चोच्चक्षेत्रादिराशिगतत्वं चिन्तनीयम्। 'बलयोगात्फलमंशकर्क्षयोः' इति राश्यंशयोः साम्यं पूर्वमेवोक्तम्। अपिच—

"ग्रहयुक्तनवांशराशितुल्यं बहुसाम्यं समुपैति सत्यवाक्यम्"

इति सत्यमतप्रशंसयाप्यंशकप्राधान्यमेवात्र व्यक्तीभवति। चन्द्रयोगास्तु हित्वार्कमित्यादिग्रन्थेनोक्ताः। तत्र सुनफाअनफादुर्धरायोगास्त्रयः 'स्वयमधिगतवित्त' इत्यादिना तेषां फलं च कथितम्। तत्र योगकर्तृभेदेन फलभेदोऽस्ति शास्त्रान्तरेषु विस्तरतो निर्दिष्टाः।

अत्र तूत्साहशौर्यधनसाहसवानित्यादिना ग्रहस्वभावः कथितः तेन च पूर्वोक्तफलेन विचार्य फलं वाच्यम्। तदर्थं 'त्रिंशत्स्वरूपाः' इत्यादिना संख्याकरणम्। अत्र योगकर्तारो ग्रहाः केन्द्रगताश्चेद्योगस्यातिशुभत्वं कल्पयेत्। तथा च सारावल्याम्—

"चन्द्राद्ग्रहैर्निगदिताः सुनफादयः स्युः
केन्द्रस्थितैर्यदि भवन्ति च तेऽत्र योगम्।

विश्वम्भरापतिकुलेषु महत्सु जाता
योगेषु तेषु मनुजेश्वरतां लभन्ते ॥"

चतुरस्रे केन्द्रे वा पापैर्दुर्धरायोगश्चेदशुभफलमपि चिन्तनीयम् 'पापान्तस्थे निधनहिबुकद्यूनसंस्थे च चन्द्रे' इति स्वेनैवोक्तत्वादेते योगा न यदा भवन्ति तदा केमद्रुम इति केषांचिन्मतम् । अन्येषां गर्गप्रभृतीनां पक्षे तु सुनफादीनामुक्तलक्षणाभावे विलग्नकेन्द्रे अथवा चन्द्रे केनचिद्ग्रहेण युक्ते केमद्रुमाभाव इति । तथा च सारावल्याम्-

"एते न यदा योगाः केन्द्रे ग्रहवर्जिते शशाङ्के च ।
केमद्रुमोऽतिकष्टः शशिनि समस्तग्रहादृष्टे ॥"

इति केन्द्रनवांशकेषु च वदन्तीति केचिच्छुभकीर्तिप्रभृतयः केन्द्रेषु गतैर्ग्रहैर्योगान्वदन्ति केचिज्जीवशर्मप्रभृतयो नवांशकेषु गतैर्ग्रहैर्योगान्वदन्ति । चन्द्राच्चतुर्थस्थितैरनफा चतुर्थदशमस्थितैर्दुर्धरा इति ।

तथा च श्रुतकीर्तिः-

"चन्द्राच्चतुर्थसंस्थैः सुनफानफा दशमस्थैः ।
उभयस्थैर्दुर्धरा केमद्रुमसंज्ञितोऽन्यैः स्यात् ॥" इति ।

पुनश्चन्द्राक्रांशनवांशराशेर्द्वितीयराशिगतैः सुनफा द्वादशराशिगतैर्दुर्धरा । तथा च जीवशर्म्मा-

"यद्राशिसंज्ञे शीतांशुर्नवांशे जन्मनि स्थितः ।
तद्द्वितीयस्थितैर्योगः सुनफाख्यः प्रकीर्तितः ॥
द्वादशे त्वनफा ज्ञेया द्वितीयद्वादशस्थितैः ।
प्रोक्तोऽयं दुर्धरायोगोऽन्यथा केमद्रुमो मतः ॥" इति ॥

केचित्केन्द्रनवांशकेषु च वदन्तीत्यनेन व्याख्यातोऽयमर्थ इतिव्यक्तं भवति किमर्थमाचार्येणैव कृतं तन्मतानादरणायेति कल्पनीयम् । वा 'उक्तिप्रसिद्धा न ते' इतिवचनाद्ग्रहाणां बलपौष्कल्ये तन्मतमपि कदाचित्संगच्छेत इति मतं च प्रकाशितम् । 'अन्यमते शुभकृदुडुपोह्नि दृश्यमूर्तिः' इति । अह्नि दृश्यार्धगतश्चन्द्रोऽशुभकृद्भयशोकादिकृत् । गलिततनुश्च अपरपक्षगतचन्द्र इत्यर्थः । अन्यथान्यदूह्यम्-दृश्यार्धगतः शुभकृत्पूर्यमाणतनुः शुभश्च । तथा च सारावल्याम्-

"उत्पातकं कृततनुर्निशि चाप्यदृश्यो
दृश्यो दिवा शिशिरगुर्भयशोकदाता ।
एवं स्थितः समफलं पृथिवीपतित्वं
जातोऽन्यथा प्रकुरुते परिपूर्णमूर्तिः ॥" इति ।

गलिततनुरह्नि शुभ इत्यन्यशास्त्रान्तरेऽप्युक्तम्-

"पक्षे सिते भवति जन्म यदि क्षपायां
कृष्णेऽथवाहनि शुभाशुभदृश्यमानः ।
तच्चन्द्रमा रिपुविनाशगतोऽपि यत्ना-
दापत्सु रक्षति पितेव शिशून्न हन्ति ॥" इति ।

नन्वयमर्थोऽशुभकृदुडुप इत्यादिना कथमुच्यते अह्नि दृश्यमूर्तिरुडुपोऽशुभकृदह्नि दृश्यमूर्तिरिरिति अह्न्यनुदित इत्यर्थः पक्ष एव घटते गलिततनुः कृष्णपक्षचन्द्रः अह्नि शुभकृदित्यर्थः अन्यथाऽन्यदूह्यम् । रात्रौ शुक्लपक्षचन्द्रः शुभोऽपरपक्षचन्द्रोऽशुभ इति संगच्छते । 'अहनि निशि च चन्द्रे स्वाऽधिमित्रांशके वा सुरगुरुसितदृष्टे वित्तवान्स्यात्सुखी च' इति निरूपणीयम् । अत्राहनि गुरुदृष्टो निशायां सितदृष्ट इति क्रमो विवक्षितः सुनफायोगास्तु समस्तसाधारणत्वेन निरूपणीयाः । द्विग्रहयोगास्तु । 'तिग्मांशुर्जनयत्ययेन्दुसहितो यन्त्राश्मकारं नरम्' इति यन्त्राणां मद्यरतमनृतवधबन्धनादिरतं श्मश्रुकारो नापितवद्वृत्तिः 'कथितफलैः परतो विकल्पनीयाः' इति । परतोऽपरे परतास्त्रिग्रहयोगादयः कथितफलैरूहेन कल्पनीया इति । अर्कचन्द्रयोगजमर्ककुजयोगजं चन्द्रकुजयोगजं च फलसमूहेन कल्पनीयामिति । इति त्रिग्रहचतुर्ग्रहषड्ग्रहयोगफलं शास्त्रान्तरैश्चिन्त्यमित्यर्थः । प्रव्रज्यायोगास्तु 'एकस्थैश्चतुरादिभिः' इत्यादिनोक्ताः । चतुरादिभिश्चतुर्भिः पञ्चभिः षड्भिः सप्तभिर्वा बलयुक्तैः सर्वैर्नास्तगैर्न नीचैः पृथग्वीर्यगैः स्वोच्चादिगतैः प्रव्रज्याबलिभिः समाश्रयादि बलवन्तस्तैः समं प्रव्रज्या भवन्ति । माघे यज्ञोत्पादिदीक्षाविशेषकथनं वन्याशनाः । तथा च सारावल्याम्-

"अग्नीनां परिचारका गिरिनदीतीराश्रमे तापसाः
सूर्याराधनतत्परा गणपतेर्भक्ता उमायाश्च ये ।
गायत्रीं जपतां वने नियमिनां गंगाभिषेकार्थिनां
कौमारव्रतमिच्छतामधिपतिस्तेषां सदा भास्करः ॥"

वृद्धशब्देनोक्तमर्थं वक्ष्यामि । सारावल्यामुक्तम्-

"वृद्धश्रावकभस्मधूलिधवलाः शैवव्रते ये स्थिता
वर्ह्णीं पातकितां गता भगवतीभक्ताश्च निःसंगिनः ।
शुद्धास्ते खलु सोमनाम्नि निरताः कापालिका निष्ठुरा-
स्तेषां नायकतां गतः शशधरः खट्वाम्बुनाभ्युक्षितः ॥"

"उपासका बुद्धसमाश्रयं गताः शिखां विना पाण्डरभिक्षवश्च ये ।
सुवाससो रक्तपटा जितेन्द्रियाः प्रभुः सदैषां क्षितिजः प्रकीर्तितः ॥
आवेशिनां कुहकिनां समयाधिका ये ये दीक्षितास्तनुभृतो गरुडे च तंत्रे ।
ये वै मयूरपिशिताशनयोश्च युक्तास्तेषां शशांकतनयोऽधिपतिर्नियुक्तः ॥"

"एवं स्त्रीसहिता वदन्ति मुनयो दण्डान्कषायाम्बरान्-
वानप्रस्थमुपागताः फलपयोभक्ताश्च ये भिक्षवः ।
गार्हस्थ्येन तु संस्थिता नियमिनः सुब्रह्मचर्यं गता-
स्तेषां नायकतां गतः सुरगुरुस्तीर्थेषु ये स्नातकाः ॥"
"पशुपतियज्ञे दीक्षां व्रतेषु ये नित्यमेव संयुक्ताः ।
चरकाणामपि तेषां नेता प्रकीर्तितः शुक्रः ॥
पाखण्डव्रतनिरता दिगम्बराश्चैकभिक्षवो ये च ।
तेषामाधिपतिरार्किः श्रावकतरुमूलिनश्च दुस्तपसः ॥"

इति कारकयोगाश्चिन्त्याः । स्वर्क्षतुंगमूलत्रिकोणगा इत्यत्र स्वर्क्षांशगानां च ग्रहणमस्ति । तथा च सारावल्याम्-

"तुंगसुहृत्स्वगृहांशे स्थिता ग्रहाः कारकाः समाख्याताः ।
मेषूरणे रविरिति विशेषतो वक्ति चाणक्यः ॥
लग्नगतः सुखसंस्थः कामस्थश्चापि कारकाः सर्वे ।
एकादशेऽपि केचिद्वाञ्छन्ति तन्मतं मुनींद्राणाम् ॥"

इत्यत्र स्वोच्चत्रिकोणस्वर्क्षगैः कुजादिभिस्ताराग्रहैरुचकादयः पञ्चमहायोगाः शास्त्रान्तरेषु प्राधान्येन कथिताः । अत्र तु 'अशून्येषु च केन्द्रेषु कारकाख्यग्रहेषु च' इत्यत्रान्तर्भूता भवन्ति तेन विशेषो न प्रदर्शितः । ते पञ्च महायोगाः प्राधान्येन निरूपणीयाः । तथा च सारावल्याम्-

"स्वक्षेत्रेऽथ चतुष्टये सुबलिभिः स्वोच्चस्थितैर्वा ग्रहैः
शुक्रांगारकमन्दजीवशशिजैरेतैर्यथानुक्रमात् ।
मालव्यो रुचकः शशोऽथ कलितो हंसश्च भद्रस्तथा
सर्वेषामिति विस्तरान्मुनिमतं संकल्प्यते लक्षणम् ॥"

योगकर्तृकग्रहानुरूपं फलं च वक्तव्यं चन्द्रयोगाध्याये 'उत्साहशौर्यधनसाहसवान् महीजे' इत्यादिग्रन्थेन तर्कणीयं यत्फलं तस्यातिशयोऽत्र योगानामूह्यः विशेषादपि सारावल्यां फलमुक्तं तदत्र लिख्यते-

"बलरहितेन्दुरविभ्यां युक्तैर्भौमादिभिर्ग्रहैः ।
योगैर्न भवन्ति भूमिपाला दशासु तेषां सुखार्थयुताः ॥"
"न स्थूलोष्ठो न विषमवपुर्नातिरिक्तांगसन्धि-
र्मध्ये क्षामः शशधरमतिर्हस्तिनादः सुगण्डः ।
व्यादीर्घाक्षः समरवरदो जानुदेशाप्तपाणि-
र्मालव्योऽयं विलसति नृपः सप्ततिर्वत्सराणाम् ॥"

"दीर्घास्यः स्वच्छकान्तिर्बहुरुचिरबलः साहसोदात्तकार्य-
श्चारुभ्रूर्नीलकेशः श्रवणपथगतो मन्त्रविन्नौरनाथः ।
रक्तश्यामोतिशूरो रिपुबलमथनः कम्बुकण्ठः प्रधानः
क्रूरो भक्तो नराणां द्विजगुरुविनतः क्षामसज्जानुजंघः ॥"
"खट्वाङ्गपाशवृषकार्मुकवज्रवीणाचक्राब्जहस्तचरणश्च शतांगुलश्च ।
मन्त्राभिचारकुशलस्तुलया सहस्रं मध्ये च तस्य कथितं मुखदैर्घ्यतुल्यम्
"विन्ध्याचलसह्यगिरीन् भुनक्ति सप्ततिं च नागरान्देशान् ।
शस्त्रानलकृतमृत्युः प्रयाति देवालयं रुचकः ॥"
"तनुद्विजास्यो द्रुतगः शशोदयः शठोऽतिशूरोऽभिकृतिप्रधानः ।
नीचाद्रिदुर्गेषु नदीषु सक्तः कृशो नरो नातिलघुः प्रसिद्धः ॥"
"पर्यंकशंखहलशंखमृदंगमाला
वीणोपमा यदि करे चरणे च रेखा ।
वर्षाणि सप्ततिमितानि करोति राज्यं
प्रान्तिकक्षितिपतिः कथितो मुनीन्द्रैः ॥"
"रक्तास्योन्नतनासिकः सुचरणो हंसः प्रसन्नेन्द्रियो
गौरः पीनकपोलरक्तकरजो हंसध्वनिः श्लेष्मलः ।
शंखाब्जांकुशदाममत्स्ययुगलश्चक्रांगमालाघटै-
श्चिह्नैः पादपराङ्कितो मधुनिभे नेत्रे च वृत्तं शिरः ॥"
"पातीह देशान्खशशूरसेनान् गान्धारगंगायमुनान्तरालान् ।
जीवेन्नवानां दशवर्षसंख्यं पश्चाद्वनान्ते समुपैति नाशम् ॥"
हंसे-"शार्दूलप्रतिमाननो द्विजपतिः पीनोरुवक्षस्थलः
सद्वाक् पीनसुवृत्तबाहुयुगलस्तत्तुल्यमानोच्छ्रयः ।
कामी कोमलसूक्ष्मरोगनिकरैः संरुद्धगण्डस्थलः
प्राज्ञः पंकजगर्भपाणिचरणः सत्त्वाधिको योगवित् ॥"
शंखादिकुञ्जरगदाकुसुमेषुकेतुचक्रांगलांगलविचिह्नितपाणिपादः
पत्रागुरुद्विपदगो प्रथमाम्बुसिक्तहृत्कुंकुमप्रतिमगन्धतनुः सुघोणः ॥
शास्त्रार्थविद्धृतियुतः समसंहतभ्रूर्नागोपमो भवति वस्तु निगूढगुह्यः ।
सत्कुक्षिधर्मनिरतः सुललाटजङ्घो धीरस्थिराव्यसितकुंचितकेशपाशः"

भद्रयोगः कारके योगे जन्मशुभमिति । तथा-

"नीचकुले सम्भूतः कारकविहगैः प्रधानतां याति ।
क्षितिपतिवंशसमुत्थो भवति नरेन्द्रो न सन्देहः ॥" इति ।

आश्रययोगास्तु 'कुलसम' इति 'स्वभैकवृद्धया' अत्र स्वशब्दस्त्रिकोणादीनामप्युपलक्षणार्थः। ग्रहाणां पृथक्पृथगुच्चक्षेत्राद्याश्रयफलं शास्त्रान्तरेषूक्तम्। अत्र युगपत्स्वक्षेत्राद्याश्रयफलमुच्यते। पृथक्पृथगाश्रयफलन्तु पूर्वं स्थानबलाध्याये कथितमित्यत्र नोक्तम्। कुलसमकुलमुख्यादीनां ग्रहानुगुणं फलं निरूपणीयम्। अत्र स्वभावादिस्थितोऽप्यलग्नजन्मराशितदंशेशानामन्यतमश्चेत्कुलसमत्वादगुणं विशेषेणापि वक्तव्यम्। 'जनयति नृपमेकोऽप्युच्चगो मित्रदृष्टः' पूर्वश्लोकेन स्वभस्थितस्य मित्रभास्थितस्य च फलमुक्तमनेन श्लोकेन उच्चस्थितस्य फलमुच्यते तत्रायं विशेषः। स्वभास्थितेषु सप्तग्रहेषु एवं नृपत्वं मित्रभावस्थितेष्वपि तथैवोक्तम्। उच्चस्थित एकोऽपि अनन्यापेक्षः नृपं जनयति उच्चप्राधान्यमत्रापि द्योतितम्। 'प्रचुरधनसमेतं मित्रयोगाच्च सिद्धिम्' इत्यनेन योगादृष्टेः प्राधान्यं सूचितम्। विवस्वित्यादि विवसुर्निर्द्रव्यो विमुखश्च बहुलो नीचश्च मूढो मूर्खश्चाधर्मरतो व्याधितो निश्चेष्टः भृतकश्च। बन्धुतप्तः प्रभिन्नदारः अगृहश्च दासश्च वधसमेतः सर्वेभ्यो दुरितसमे परान्नभोक्ता। परहिंसको दरिद्रो दुःखभाक् पतितः सर्वदा दुरितफलमनुभवतीत्यर्थः। शत्रुगृहेषु फलानामीषन्न्यूनत्वमनेन पूर्वदशासु शत्रुनीचगृहयातदशायां 'छिद्रसंश्रयदशा परिकल्प्या' इत्यनेनापि राजयोगफलभंग ऊह्यः इति।

निर्याणयोगस्तु 'मृत्युर्मृत्युगृहे इति कालमृत्य्वादिगुलिकादयश्चिन्त्याः। शैलाग्राभिहतस्य' इत्यादिना मृतिभेद उच्यते। स हि चन्द्रपापग्रहैः प्रायशो भवति योगानामभावे द्वाविंशतिमस्तु कारणमित्युच्यते-

"मेषाद्ये द्रेष्काणे क्रूरग्रहवीक्षिते न शुभदृष्टे।
अम्बुविषमपित्तकृतं मरणं नृणां समादेश्यम॥"

इत्यादिना, सारावल्यामुक्तेन ग्रन्थेन द्रेष्काणैर्मरणं चिन्त्यम्। तथा च सारावल्याम्-

"उदयाद्द्वाविंशतिमो द्रेष्काणो भवति कारणं मृत्यौ।
तस्याधिपतिर्भावान्निर्याणं सूचयेत्स्वगुणैः॥
मेषाद्यैर्द्रेष्काणैः क्रूरग्रहवीक्षिते न शुभदृष्टे।
अम्बुविषमपित्तकृतं मरणं नृणां समादेश्यम॥
विद्याद्द्वितीयभागे तज्जलकृत्यावनाद्यैश्च।
एवं तृतीयभागे तडागकूपप्रपाताद्वा॥
वराहकरभखरोष्ट्रैर्मृत्युर्ज्ञेयो वृषाद्यैर्वा॥
पित्ताग्निपातचौरैर्द्वितीयभागे वृषैश्चैव॥
विद्यात्तृतीयभागे यानासनवाजिपातकृतम्।

पुंसां भवति हि मरणं शिरसि महावेधकृतमेव ॥
मिथुनाद्यतृतीयांशे कासश्वासस्सलिलोद्भवो भवति ।
मृत्युकर्मभिषक् वृषभाद्वा तृतीयके सान्निपाताद्वा ॥
वनवासिनश्चतुश्चरणात्सर्पपतनात्तथारण्ये ।
भवति द्विमृत्युः पुंसामंत्ये भागे तु जनुषश्च ॥
नरवणमद्यपानात्कण्टकदोषेण वा तथा स्वमात् ।
भवति हि कर्कटकाद्यैर्मृत्युर्नृणां तृतीयभागे तु ॥
अभिशापाद्विषपानान्मध्यत्र्यंशे भयं समादिष्टम् ।
प्रमेहगुल्मस्त्रंसनप्रमुखैर्दोषैस्तथाऽचान्त्ये ॥
सलिलाद्विवादरोगात्सिंहाद्ये त्र्यंशके भवेन्मृत्युः ।
मध्यतृतीयभागे जलमयकृतो वनोद्देशे ॥
विषशस्त्रयोगदोषैर्नित्यं विषमान्नपानाद्वा ।
अन्त्ये सिंहत्र्यंशे भवति हि मृत्युर्न सन्देहः ॥
आद्ये कन्यात्र्यंशे मस्तकरोगात्तथा निलान्मृत्युः ।
बालाच्च शैलदुर्गे मध्ये भूपात्मजादथवा ॥
करवरशस्त्रतोदादभिशापात्स्त्रीकृतान्नपानाद्वा ।
अन्त्ये कन्यात्र्यंशे नृणां मृत्युः समादिष्टः ॥
आद्ये वणिक्त्रिभागे युवतिचतुष्पदनिपातदोषेण ।
मध्ये कुञ्जरदोषैरन्त्ये व्यालाम्बुदोषेभ्यः ॥
आद्येऽलिनस्त्रिभागे विषशस्त्रस्त्रीरसान्नपानकृतः ।
मध्ये कटिवस्तिभागस्रंसनदोषैर्भवति मृत्युः ॥
अन्त्ये तृतीयभागे इष्टकपाषाणपातवेदनया ।
भवति हि मरणं यानान्नृणां जङ्घास्थिभंगकृतम् ॥
चापस्याद्ये त्र्यंशे गुदानिलसमुद्भवैर्विविधरोगैः ।
मध्ये विषगरदोषैर्भवत्यनिलकृतैर्वा मृत्युः ॥
अन्त्ये तृतीयभागे जलमध्ये तत्समुत्थितैर्वापि ।
मृत्युर्नृणां दृष्टो जरामरणदोषसम्भूतः ॥
मकराद्ये द्रेष्काणे नृपहिंस्रव्याघ्रकारणो मृत्युः ।
ऊरुविनाशकृतो वा जलचरसविषैकशफसर्पात् ॥
दहनास्त्रतस्करेभ्यो ज्वरातिसारादमानुषजनात् ।
अन्त्ये मकरत्र्यंशे नृणां मृत्युर्जनैरुक्तः ॥

कुम्भे प्रथमत्र्यंशे स्त्रीभ्यस्तेयात्तथाजठररोगैः ।
ज्ञेयो मृत्युर्नृणां पर्वतवनगहनविपद्भिर्वा ॥
मध्ये स्त्रीकृतदुःखैर्गुह्यजरोगैर्भवति मृत्युः ।
अन्त्ये मृत्युश्चिन्त्यश्चतुष्पदमुखरोगकृतैर्भवेत्पुंसाम् ॥
त्र्यंशे मीनयुगाद्ये तुल्यग्रहणीप्रमेहयुवतीभ्यः ।
जङ्घास्थलजै रोगैर्गजग्रहकृते समादिशेन्मृत्युम् ॥
नौभङ्गजनमध्ये षड्द्रेष्काणाद्द्वितीयजातानाम् ।
अन्त्ये भवति हि मृत्युः कुत्सितरोगैर्न सन्देहः ॥"

एवं द्रेष्काणो मरणकारणमित्युक्तम्—तस्याधिपतिर्भावोऽपि वा स्वगुणैर्निर्याणं प्रयच्छतीति । अधिपतिर्द्वाविंशतिद्रेष्काणाधिपतिर्भावोऽष्टमाधिपतिः । अथवा तस्याधिपतिर्निर्याणाधिपातिर्दुःखाधिपत्याच्छनिः द्वाविंशतिद्रेष्काणेशाष्टमेशमन्दास्तद्युक्तराश्यंशपाश्च गुलिकराश्यंशपाश्च निर्याणे चिन्त्याः । ननु द्वाविंशतिद्रेष्काणाष्टमेशमन्दयुक्तराश्यंशपाः गुलिकराश्यंशकेशाश्चिन्त्या इत्याचार्येण न प्रसज्यते नैषदोषः आचार्येण प्रसक्तमेव कथमिति चेदुच्यते तस्याधिपतिरित्यत्र 'दुःखं दिनेशात्मज' इति संज्ञाध्याये कथितत्वान्मरणस्यात्यन्तदुःखत्वान्मरणकारकः शनिरित्युक्तं भवति गुलिकस्य शनैश्चरांशकसम्भवत्वाद्गुलिकोऽपि मरणकारक इति विज्ञायते 'क्रूरेऽष्टमे विरवता निधनेश्वरोंऽशे यस्य स्थितो वयसि तस्य समे प्रदिष्टा' इति निधनेश्वरप्रयुक्तांशकेशस्य मरणकारकत्वमुक्तं तस्मात्सर्वेषां निधनकारकग्रहाणां तद्युक्तांशकेशानां च मरणकारत्वमूह्यम् । एतदुक्तं भवति जन्मकाले लग्नाद्बलयुताच्चन्द्राद्वा योऽष्टमो राशिस्तत्र 'मृत्युर्मृत्युग्रहेक्षणेन बलिभिस्तद्धातुकोपोद्भव' इत्युपदेशात्तस्याधिपो वा शनैश्चरेण वा गुलिकेन वा भावोऽपि वा इत्युपदेशादष्टमेशेन वा एतैर्युक्तराश्यंशकैर्वा मरणं चिन्त्यमिति एतेषां यो दुर्बलोऽनिष्टस्थानगतश्च भवति तस्य दशायामन्तमुक्तं व्याध्यादिहेतुभिर्मरणं चिन्त्यमिति । मरणकाले शनैश्चराद्यवस्थानं चैषां राशित्रिकोणेषु निरूपणीयम् । पूर्वं सद्योमरणाध्यायप्रोक्तयोगानां सम्भवे योगकर्तृग्रहदशायां च मरणं चिन्त्यम । इत्थं प्रायशो योगशब्दार्थ उक्तः ।

अथ प्रश्नविषयेऽप्ययं श्लोकश्चिन्त्यः । संज्ञाध्याये ममास्य कार्यस्य प्राप्तिः कथमिति पृष्टे यस्य यद्द्रव्यमुक्तं यस्य द्रव्यं संनिहितवस्तु दैवज्ञायार्पितमुक्तं वा वचनं यदि जीवो यत्कर्माजीवेषूपादिष्टं श्रूयमाणं 'भावस्थानावलोके योगोद्भवं च' इत्यत्र भावः प्रच्छकस्य स्वभावश्चेष्टा च हर्षशोकादयश्च स्पर्शश्च वेषं च स्थानं स्थितिप्रदेशो वा आलोकयोगोद्भवं च प्रष्टुर्योग आश्रयः सहायो वा एवमादिप्रश्नकाले यद्यज्ज्ञायते तत्सर्वं तस्य प्रच्छकस्य शुभाशुभनिरूपणदशायां योज्यमिति ॥ २० ॥

(इन्द्रवज्रा)

छायाम्महाभूतकृतां च सर्वेऽभिव्यंजयन्ति स्वदशामवाप्य ।
कंत्वग्निवाय्वम्बरजान्गुणांश्च नासास्यदृक्त्वक्छ्रवणानुमेयान् २१॥

छायामिति । जातकं न प्रायिकमिति कथयति पुरुषस्य शरीरादौ प्रत्यक्षमेव दृश्यत इति स्वमहाभूतच्छायां स्वदशासु व्यञ्जयति । महाभूतग्रहयोरपृथग्भावात्तस्माच्छरीरे महाभूतच्छाया द्रष्टव्या । तथा चाचार्यकृतसंहितायाम्—

"छाया शुभाशुभफलानि निवेदयन्ती
लक्ष्या मनुष्यपशुपक्षिषु लक्षणज्ञैः ।
तेजोगुणान्बहिरपि प्रविकाशयन्ती
दीपप्रभा स्फटिकरत्नघटस्थितेव ॥"

तथा चान्यत्र—

"स्निग्धाद्विजत्वं नखरोमकेशा छाया सुगन्धा च महीसमुत्था ।
तुष्ट्यर्थलाभाभ्युदयान्करोति धर्म्मस्य चाहन्यहनि प्रवृद्धिम् ॥ १ ॥
स्निग्धासिता च हरिता नयनाभिरामा सौभाग्यमार्दवसुखाभ्युदयान्करोति ।
सर्वार्थसिद्धिजननी जननीव चाप्या छायाफलं तनुभृतां शुभमादधाति ॥२॥
चण्डाधृष्या पद्महेमाभवर्णा युक्तं तेजो विक्रमैः सप्रतापैः ।
आग्नेयीति प्राणिनां स्याज्जयाय क्षिप्रं सिद्धिं वाञ्छितार्थस्य धत्ते ॥ ३ ॥
मलिनपुरुषकृष्णापापगन्धानिलोत्था
जनयति वधशोकं व्याध्यनर्थार्थनाशान् ।
स्फटिकसदृशरूपा भाग्ययुक्तात्युदारा
निधिरिव गगनोत्था श्रेयसां स्वच्छवर्णा ॥ ४ ॥"

न केवलं दशास्वेव महाभूतस्वभावो जायते । जन्मसमयेऽपि एकैको जन्तुर्जायते । तथा च सारावल्याम्—

"शब्दार्थविन्यासपटुः प्रगल्भो विज्ञानयुक्तो विवृतास्यभागः ।
छिद्राङ्गसन्धिः कृशपाणिपादो वामप्रकृत्या पुरुषोऽतिदीर्घः ॥
सत्त्वेन वायोः पुरुषः कृशांगः क्षिप्रं च कोपस्य वशं प्रयाति ।
कृत्यैकबुद्धिभ्रमणे रतश्च जातोऽसितो भूपतिरप्रधृष्यः ॥
शूरः क्षुधार्तश्चपलोऽतितीक्ष्णः प्राज्ञः कृशो गौरतनुर्विरोधी ।
विद्वान्सुमानी बहुप्रेक्षणश्च वह्निस्वभावः पुरुषोतिकायः ॥
लावण्यभावो जलजप्रकृत्या प्रियाभिभाषी द्रवभोजनश्च ।
सलस्वरूपो बहुमित्रपक्षः क्षोणीपतिर्नातिचिरं प्रगल्भः ॥

कर्पूरजात्युत्पलपुष्पगन्धो भुनक्ति भोगांश्चिरलब्धसौख्यः ।
सिंहासनेसुस्थिरचित्तवृत्तिर्महीस्वभावः पुरुषः सुतत्त्वः ॥२१॥" इति ।

(मालिनी)

शुभफलददशायां तादृगेवान्तरात्मा
बहु जनयति पुंसां सौख्यमर्थागमञ्च ।
कथितफलविपाकैस्तर्कयेद्वर्तमानां
परिणमति फलाप्तिस्स्वप्नचिंतास्ववीर्यैः ॥ २२ ॥

शुभफलदेति । दशासु बहुविधासु यया दशया भुज्यमानफलसंवादतां गृह्णीयादिति द्योतयितुमयं श्लोकः । अन्यथा त्रिप्रकारं दशानयनमनर्थकं भवति ननु गणितानीतदशाफलभुक्तफलयोः संवादेनैव दशा प्रमाणी कर्तव्या चेत्फलानां दशा। नयनं कर्त्तव्यं द्वादशवर्षादधस्तनवयस्कस्य बालस्य केवलमरिष्टयोगेनायुर्नाशोपदेशात् । यद्येवं दशायाः प्रामाण्यं न भवति कथं तेन दशानयनप्रमाणभूता एवं स्यादायुःस्थितिर्जन्मकालादारभ्य प्रथमे वर्षे केवलं सद्योऽरिष्टैरेवायुः खण्ड्यते । द्वादशवर्षात्पूर्वमरिष्टयोगैर्दशासापेक्षैर्द्वासप्ततिवर्षात्पूर्वं मध्यायुर्योगसापेक्षैर्दशाभेदैरत ऊर्ध्वं विंशत्याधिकशतात्पूर्वं केवलं दशाया अत ऊर्ध्वममितायुर्योगैः सर्वत्र निर्याणग्रहस्थितिरन्वेष्टव्या-

"योगे स्थानं गतवति बलिनश्चन्द्रे स्वं वा तनुगृहमथवा ।"

इत्युक्तत्वात्तस्मादुक्तफलनिरूपणेनैव दशा प्रमाणी कर्तव्या । अपि च समकालजातयोर्द्वयोः शरीरिणोरायुः संवादादपि दशाभेदश्चिन्तनीयः । अयं त्वेवमुपदेशेशः काचिदपि दशा प्रमाणीकर्तव्या नैष दोषोऽन्येन केनैव विज्ञायते आचार्याभिप्रायो भवता न विदितः ।

प्रथमं 'मययवनमणित्थशक्तिपूर्वैः' इत्यादिश्लोकेन बह्वाचार्यवैषम्यं चिन्तयताचार्येण सत्योपदेशः प्रवरोऽत्रेति अंशकदशापि कथिता । पुनः क्वचिद्विषये जीवशर्म्मदशासंगच्छत इति सापि दर्शिता । तस्मात्त्रिषु दशापरिग्रहप्रकारेषु केनचित्प्रकारेण भुक्तफलसंवादो भवतीति । नहि 'कथितफलविपाकैस्तर्कयेद्वर्तमानाम्' इत्युपादिष्टम् । तस्मात्परीक्ष्य निर्णेतव्यमित्युक्तं भवति । वक्ष्यति च नष्टजातकाध्याये-नष्टजातकमिदं मया बहुप्रकारं निर्दिष्टं ग्राह्यम् । अतस्तच्छिष्यैः परीक्ष्य यत्राद्यथा भवतीति । गणितस्कन्धेऽपि परीक्षणेनैव दृग्ग्रहणग्रहयोगादीनां संवादो जायते । अन्यथा परस्परभिन्नानां पञ्चसिद्धान्तानां निर्माणं निरर्थकं भवतीति । शुभफलददशायां तादृगेवान्तरात्मा इत्यत्रान्तरात्मान्तःकरणं मनस्तादृक् शुभं प्रसन्नं रागद्वेषादिकलुषितं न

भवतीत्यर्थः। तथा च यात्रायां प्रष्टव्यो दैवविदा विस्रब्धमुपह्वरे नराधिपतिः। रिपुविजयप्रणिधानं प्रतिभवतः किं मनः कुरुते। ब्रूयान्मनः प्रोत्सहते हर्षयते ततश्चैनम्। चित्तानुकूलतासिद्धिलक्षणम्। तत्रायं श्लोकः—

"शुभाशुभानि सर्वाणि निमित्तानि स्युरेकतः।
एकतश्च मनो यातुस्तद्धि शुद्धं जयावहम्॥"

इत्यादि। तस्मात्सर्वेभ्यो लक्षणेभ्यो मनः प्रमाणीकर्तव्यम्। ततो मनः प्रसन्नं चेद्दशापि शुभफलदेति विज्ञातव्या। मनः पुंसां सौख्यमर्थागमं च बहु जनयति। अनयानुगामिनो मनसः प्रवृत्त्या सर्वशः सौख्यमर्थागममाभिमतार्थाः सर्वतः सिद्ध्यन्तीत्यर्थः। अन्तराख्येति पाठे शुभफलददशायां शुभफलदान्तर्दशा चेत्तयोरुभयोः संयोगाद्बहुसौख्यमर्थागमं च पुरुषा लभन्त इत्यर्थः। 'कथितफलविपाकैस्तर्कयेद्वर्तमानाम्।' इत्यत्र कथितफलानावश्यभावित्वं सूचितम्। तदेव दृढीकर्तुं—"परिणमति फलोक्तिः स्वप्नचिन्तास्ववीर्यैः' इत्युक्तं फलवचनं परिणमत्येवं दशाफलं पुरुषेणावश्यं भोक्तव्यमित्यर्थः। किन्तु अवीर्यैर्बलरहितग्रहैर्यत्फलमुक्तं तत्स्वप्नचिन्तासु परिणमति पुरुषेण किमप्यभुक्तं न भवतीत्यर्थः। 'उच्चफलोक्तिः स्वप्नचिन्तास्ववीर्यैः' इति शुभाशुभसामान्यप्रयुक्तमुच्चत्रिकोणेत्यादिश्लोकेन फलं संपूर्णपादोनदलपादाल्पानिष्फलमितिशुभमुक्तम्। तस्मात् षट्पदकथनयोरैकात्म्यं स्यादुच्यते एवं हि मन्यते 'कथितफलविपाकैस्तर्कयेद्वर्तमानाम्' इत्यत्रोच्चत्रिकोणेत्यादिश्लोकेन नैर्मल्यप्रसङ्गादर्कग्रहस्य शुभफलप्रदस्य नैष्फल्यं वर्तमानदशातर्केण कथितफलविपाकैरनुपपन्नं स्यादित्याशंकां परिहरन् 'परिणमति फलोक्तिः स्वप्नचिन्तास्ववीर्यैः' इति कथयति तस्माच्छुभं प्रत्येवमुदितम्। 'दशासु शस्तासु शुभानि कुर्वन्त्यनिष्टसंज्ञास्वशुभानि चैवम्' इति पूर्वमेवोपदिष्टत्वात्स्वप्नचिन्तास्विति स्वप्नाश्च बहुविधा भवन्ति। तथा च यात्रायाम्—

अनुक्त आद्ये स्मृत आयुषोंशे शेषे त्रिभागे गतिजः प्रदिष्टः।
प्रकोपपापग्रहपाकचिन्तादृष्टाभिचारोद्भवगुह्यकोत्थाः॥
गतैष्यजात्यन्तरसङ्गिसंगः स्वप्नेप्यनूके गतिजे च नित्यम्।
धातुप्रकोपादनिलात्मकस्य वर्षादितुंगाम्बरलङ्घनानि॥
पित्तेऽधिके कांचनरत्नमालां दिवाकराग्निप्रभृतीनि पश्यन्।
श्लेष्माधिकश्चेन्दुभशुभ्रपुष्पं सरित्सरोजाम्बुविलङ्घनानि॥
जघन्यमध्यप्रथमे निशांशे प्रावृट्छरन्माधवसांज्ञिते च।
काले मरुत्पित्तकफप्रकोपात्साधारणं स्यात्खलु संनिपाते॥
दशासु चोक्तं ग्रहपाकजातं चिन्तासु दृष्टं च यथा तथैव।
बीभत्सरस्वादिभवोऽभिरामे पित्तोद्भवो गुह्यकजः प्रदिष्टः॥

आयुष्यचिन्ताग्रहदोषदृष्टान्यभीष्टकर्माणि च निष्फलानि ।
युदृष्टपूर्वान्कथितांश्च तद्वदन्यत्र लोके कथिता विशेषाः ॥" इति ।

अन्यशास्त्रान्तरेऽप्युक्तम्-

"दृष्टः श्रुतोऽनुभूतश्च प्रार्थितः कथितस्तथा ।
भाविजो दोषजश्चैव स्वप्नः सप्तविधः स्मृतः ॥"

इत्यत्र भाविजस्य स्वप्नस्य विशेषोऽस्ति प्रत्यक्षवद्भवति वचनान्तः स्वप्ननियमात्सदसत्फलाप्तिः । 'स्वप्ने शुभाशुभफलं कथितं नराणामुद्देशमात्रमिहताननुवर्णयामि ।' इति ग्रहपाकजस्वप्नो न भाविफलसूचक इत्यत्रापि सिद्धं भवति प्रश्नादौ तु 'शुभफलददशायां तादृगेवान्तरात्मा' इत्यत्र प्रच्छकस्य भावस्यानालोकयोगेषु शुभेषु दैवज्ञस्यान्तरात्मापि प्रसन्नश्चेद्बहुसौख्यमिष्टार्थागमनं च भवति । 'कथितफलविपाकैस्तर्कयेद्वर्तमानाम्' इत्यत्र प्रच्छकेन यत्फलं कथितं पृष्टं च तस्य विपाकैस्तदानीं दृष्टैः श्रुतैर्वा वर्तमानदशामवस्थां तर्कयेत् यथा जलप्रश्ने जलदर्शनश्रवणादिना वर्षा भवतीत्युच्यते । एवं फलमुच्यते तत्सर्वमेव निरूपणीयमित्येवं स्वप्नचिन्तास्ववीर्यलक्षणं प्रत्यक्षं यद्भवति यत्स्फुरतीत्यादिनोक्तम् । तादृशस्य फलमवश्यं भवति । कालभेदत्वात्कालश्चोच्यते मिहिरेणास्मदाचार्येण-

"आद्ये वर्षाद्वत्सरार्धाद्द्वितीये यामे पाको वर्षपादात्तृतीये ।
मासात्पाकः शर्वरीपश्चिमांशे सद्यः पाको गोविसर्गेषु दृष्टे ॥"

अत्र स्वप्नानां शुभाशुभत्वमन्यस्माच्छास्त्रान्तरादवगन्तव्यम् । चिन्तास्ववीर्ये तु प्रच्छकस्य प्रश्नसौष्ठवं दैवज्ञस्य सावधानत्वं चेत्यलमतिप्रसङ्गेन ॥ २२ ॥

(वसंततिलका)

एकग्रहस्य सदृशे फलयोर्विरोधे
नाशं वदेद्यदधिकम्परिपच्यते तत् ।
नान्यो ग्रहः सदृशमन्यफलं हिनस्ति
स्वां स्वां दशामुपगताः स्वफलप्रदाः स्युः ॥ २३ ॥

इति श्रीवराहमिहिरविरचिते बृहज्जातके दशान्तर्दशाध्यायोऽष्टमः॥८॥

एकग्रहस्येति । शुभाशुभयोः फलयोर्विरोधे सदृशे तयोर्द्वयोः फलयोर्नाशं वदेत् शुभाशुभयोः फलयोर्यदाधिकं शुभमशुभं वा तत्परिपच्यतेऽनुभूयते कारणबहुत्वाद्वा तस्य गौरवाद्वाधिक्यम् । एतदुक्तं भवति नैसर्गिकदशान्तर्दशाविदशाराशिफलं भावफलं दृष्टिफलमष्टकवर्गफलं होरादिवर्गफलं प्रत्यब्दमासनिशाफलादिभेदैः, शुभाशुभफलविपाकः तेषु शुभाशुभफलेषु उभयोः साम्ये तयोः फलयोरभावः यस्याधिक्यं

तस्य परिपाकः । यथा पुरुषस्य जन्मकाले पुत्रस्थाने गुरुः पुत्रप्राप्तिर्न दृष्टश्चेत्कथमिति सन्देहात्तन्निर्णीयते तथा विचारः अनेकविधकारणान्तरेण 'मकरे नीचोल्पवित्तो मुखी' इत्यादिवचनेन गुरोरनिष्टफलदत्वं च यदा भवति तदा शुभाशुभयोर्विरोधः । पुनरष्टमाधिपतेरशुभत्वमूह्यम् । 'तस्याधिपतिर्भवोऽपि वा निर्याणं स्वगुणैः प्रयच्छति' इतिवचनात् । तथा चोक्तम्–

यद्भावस्थोऽष्टमपस्तद्भावो नश्यते न सन्देहः ।" इति ।

भावाधिपतित्वाद्भावपुष्टिस्तस्याष्टमाधिपतित्वाद्भावहानिरित्युभयं यत्र दृश्यते तत्र च फलयोर्विरोधः । यदधिकं परिपच्यते न च इत्यस्योदाहरणम्–शनेस्तावन्मेषस्थस्य मूर्खोऽटनः कपटवानित्यशुभत्वं तस्यैव लग्नगतत्वे " प्रदुष्टार्थो रोगी" इत्यादिनाप्यशुभफलत्वम्–

'परविभवपरिच्छदोपभोक्ता रवितनयो बहुकार्यकृद्गुणेशः' इत्यनेन शुभफलदत्वं च यत्र सम्भवति तत्राशुभफलस्याधिक्यात्तत्परिपच्यते । एवं बहुधा फलपरिपाकः श्रीपतिनाप्युपदिष्टस्तथा च तद्वाक्यम्—

"पाकं द्वादशधा वदन्ति यवना दिग्भेदभिन्नं तथा
माणित्थाः खलु बादरायणमुनिस्तं चाष्टधा प्रोक्तवान् ।
षड्भेदं खलु सिद्धसेनविबुधस्तं देवराद्यः पुन–
र्भेदैरब्धिमितैरुदारधिषणाः श्रीविष्णुगुप्तास्त्रिभिः ।"
"पाकं द्विभेदं पुनराह सत्यस्तच्छास्त्रदृष्ट्या कथयाम्यथैतान् ॥"

अस्यार्थो नैसर्गिकेत्यादिना पूर्वमेव व्याख्यातः ।

इति दशाध्याय्यामष्टमोऽध्यायः ॥ ८ ॥

अथाष्टकवर्गाध्यायः ९.

(शार्दूलविक्रीडितम्)

स्वादर्कः प्रथमायबन्धुनिधनद्व्याज्ञातपोयूनगो
वक्रात्स्वादिव तद्वदेव रविजाच्छुक्रात्स्मरान्त्यारिगः ।
जीवाद्धर्मसुतायशत्रुषु दशत्र्यायारिगः शीतगो–
रेष्वेवान्त्यतपः सुतेषु च बुधाल्लग्नात्सबन्ध्वन्त्यगः ॥ १ ॥
लग्नात्षट्त्रिदशायगः सधनधीधर्मेषु चाराच्छशी
स्वात्सास्तादिषु साष्टसप्तसु रवेः षट्त्र्यायधीस्थो यमात् ।
धीत्र्यायाष्टमकण्टकेषु शशिजाज्जीवाद्व्ययायाष्टगः

केन्द्रस्थश्च सितात्तु धर्मसुखधीत्र्यायास्पदानङ्गगः ॥ २ ॥
वक्रस्तूपचयेष्विनात्सतनयेष्वाद्याधिकेषूदयाः
चन्द्राद्दिग्विफलेषु केन्द्रनिधनप्राप्त्यर्थगः स्वाच्छुभः ।
धर्मायाष्टमकेन्द्रगोऽर्कतनयाज्ज्ञात् षट्त्रिधीलाभगः
शुक्रात्षड्व्ययलाभमृत्युषु गुरोः कर्मान्त्यलाभारिषु ॥ ३ ॥
द्व्याद्यायाष्टतपःसुखेषु भृगुजात्सत्र्यात्मजेष्विन्दुजः
साज्ञास्तेषु यमारयोर्व्ययरिपुप्राप्त्यष्टगो वाक्पतेः ।
धर्मायारिसुतव्ययेषु सवितुः स्वात्साद्यकर्मत्रिगः
षट्स्वायाष्टसुखास्पदेषु हिमगोः साद्येषु लग्नाच्छुभः ॥४॥
दिक्स्वाद्याष्टमदायबन्धुषु कुजात्स्वात्सत्रिकेष्वङ्गिराः
सूर्यात्सत्रिनवेषुधीस्वनवदिग्लाभारिगो भार्गवात् ।
जायायार्थनवात्मजेषु हिमगोर्मन्दात्त्रिषड्धीव्यये-
दिग्धीषट्स्वसुखायपूर्वनवगो ज्ञात्सस्मरश्चोदयात् ॥ ५ ॥
लग्नादा सुतलाभरन्ध्रनवगः सान्त्यश्शशांकात्सितः
स्वात्साज्ञेषुसुखत्रिधीनवदशच्छिद्रात्तिगः सूर्यजात् ।
रन्ध्रायव्ययगो रवेर्नवदशप्राप्त्यष्टधीस्थो गुरो-
र्ज्ञाद्धीत्र्यायनवारिगत्रिनवषट्पुत्रायसान्त्यः कुजात् ॥ ६ ॥
मन्दः स्वात्त्रिसुतायशत्रुषु शुभः साज्ञान्त्यगो भूमिजा-
त्केन्द्रायाष्टधनेष्विनादुपचयेष्वाद्ये सुखे चोदयात् ।
धर्म्मायारिदशान्त्यमृत्युषु बुधाच्चन्द्रात्त्रिषड्लाभगः
षष्ठायान्त्यगतः सितात्सुरगुरोः प्राप्त्यन्त्यधीशत्रुषु ॥ ७ ॥

अष्टकवर्गाध्यायो व्याख्यायते-स्वादर्केत्यस्मिन् श्लोके प्रथमं रविकुजमन्दाः पापग्रहाः प्रोक्ताः भृगुगुरुबुधचन्द्राः शुभग्रहाश्च तेनायमर्थो गम्यते पापग्रहाणां दुःखफलदत्वात्तत्परिहाराय शुभक्रियाः कर्तव्याः अष्टकवर्गेण चिन्त्यस्यादृष्टकर्मफल-स्यैव हि परिहार्यत्वमिति ।

"सूर्यस्याष्टसु विन्दुषु क्षितिपतेराप्ता विभूतिर्धनम्
सप्तस्वद्भुतकान्तिसौख्यविभवः षट्सु प्रतापोन्नतिः।
पञ्चस्वर्थसमागमः सदसतोः साम्यं चतुष्के त्रिके
अध्वश्रान्तिकरो द्विके गदभयं रूपेऽथ शून्ये मृतिः॥" इति।

पित्रादिकारकभूतानामर्कादीनां लग्नतुल्यत्वादर्कस्थितराशेर्नवमं पितृस्थानत्वेन निरूपणीयम्। तत्रार्कस्याष्टकवर्गफलानि निक्षिप्य त्रिकोणैकाधिपत्यशोधनं कृत्वा सर्वं पिण्डं सप्तसप्तभिर्निहत्याविभज्य शेषो यन्नक्षत्रं दृश्यते तत्रिकोणगते मन्दे पितुः पितृसमस्य वा व्यसनं वाच्यम्। अर्काष्टकवर्गे यस्मिन्राशौ फलभूयस्त्वं स्वगृहे तस्मिन्राशौ देवस्थानफलं देवाराधनं च समृद्धिकरं भवति। फलभूयस्त्वराशौ स्थिते राजदर्शनव्यवहारादिकं कार्यम्॥१॥२॥३॥४॥५॥६॥७॥

(मालिनी)

इति निगदितमिष्टं नेष्टमन्याद्विशेषा-
दधिकफलविपाकं जन्मभात्तत्र दद्युः।
उपचयगृहमित्रस्वोच्चगैः पुष्टमिष्टं
त्वपचयगृहनीचारातिगैर्नेष्टसम्पत्॥८॥

इति श्रीवराहमिहिरविरचिते बृहज्जातकेऽष्टकवर्गा-
ऽध्यायो नवमः॥९॥

इति निगदितमिति। एवं चारफलमूह्यम्। अथाष्टकवर्गफलमुच्यते। इति निगदितमित्यादिविशेषादधिकफलविपाकमिति ग्रहचारेण वा दशायां चेष्टं फलम् अष्टकवर्गेण चेष्टं चेत्तद्विशेषाच्छुभमेव भवति। उक्तविपरीतभावे विशेषादशुभमेव भवति। अथवा इति निगदितमिष्टं नेष्टमन्यादित्युक्तयोरिष्टानिष्टयोर्विशेषादन्तराद्यद-धिकं फलं तस्य विपाकं दद्युरिति।

जन्मनामित्यत्र जन्मशब्दप्रसंगतः जन्मकालीनग्रहैर्यत्तदष्टकवर्गं निक्षिप्यते इति सूचितं भवति। तत्र दद्युरिति राशौ यत्र भागे फलपाकस्तत्र चरंतो ग्रहास्तत्फलं दद्युरिति फलपाकस्यापि प्रस्तारो विज्ञायते प्रस्तारं विनापि अष्टकवर्गफलपाकभावं विज्ञातुमुपायोऽस्ति। सोऽत्रोऽच्यते। राश्यष्टमांशोऽत्र पंचविंशत्युत्तरशतद्वयलिप्तात्मकः तेष्वष्टमांशेषु शनैश्चरादीनां कक्ष्याक्रमसिद्धानां ग्रहाणां लग्नस्य च फलपाको विज्ञायते। यस्मिन्नष्टमांशेऽष्टकवर्गफलं यस्य ग्रहस्य विद्यते तस्मिन्भागे ग्रहः शुभः। अष्टकवर्गसिद्धिफलं शनैश्चरस्य चेत् सप्तग्रहस्तस्मिन्राशौ प्रथमाष्टमांशे शुक्रस्य चेत्षष्ठे चन्द्रस्य चेत्सप्तमे लग्नस्य चेदष्टमाष्टमांशे इति प्रस्तारफलविज्ञानोपायः।

अथवा विशेषादधिकफलमित्यत्र विशेषशब्देन शोधनमुच्यते त्रिकोणशोधनमेकाधिपत्यशोधनं च शास्त्रान्तरादवगम्य तस्मिन् कृते यदधिकं शिष्टं तस्य विपाकं दद्युरिति केन्द्रपणफरापोक्लिमेषु फलाधिक्यात्पत्ताभ्यामादिमध्यमाद्यवस्थासु शुभाशुभं चिन्त्यम् । व्ययभावादायभावे फलाधिके सति धनवान् भवति । यत्राष्टाविंशतिफलानि तस्य भावस्य मध्यमत्वं यत्र तदूनानि तस्याधमत्वम् । यत्र तदधिकानि तस्योत्तमत्वमित्याद्यष्टकवर्गविधानेन बहु निरूपणीयम् । तदत्रोच्यते विशेषादधिकफलं पाकजन्मिनां तत्र दद्युरिति ।

उपचयग्रहमित्रेत्यादिना तु ग्रहबलाबलं शुभाशुभचारमष्टकवर्गफलानि निरूप्य फलविशेषश्चिन्त्यते । 'उपचय' इत्यादिश्लोकोत्तरार्धस्यार्थोद्विप्रकारो व्याख्यायते । ग्रहाणां जन्मकाले स्थितिवशाच्चारवशाच्च ते तत्र प्रथमं जन्मकाले ग्रहाणां स्थितिवशाद्योऽर्थ उच्यते सोऽत्रोच्यते । जन्मचन्द्रस्थितराशेर्लग्नाच्च यान्युपचयस्थानानि त्रिषड्दशैकादशानि तेषु गतैर्मित्रग्रहाण्युच्यंते । स-सब्देन स्वराशिमूलत्रिकोणराशिरुच्यते । उपचयशब्देनोच्चराशयस्तेषु गतैर्ग्रहैर्यदिष्टं फलं दीयते तत्पुष्टं भवति सम्पूर्णं भवतीत्यर्थः । त्वपच्चयग्रहनीचारातिगैर्नेष्टसम्पत्' इत्यत्र अपचयग्रहनीचारातिगैर्ग्रहैर्दत्तस्येष्टस्य सम्पत् न । अथवा अपचयग्रहनीचारातिगैर्गष्टमनिष्टं यत्तस्य संपत् न भवति । अथवोपचयग्रहमित्रस्वोच्चगैरित्यादिश्लोकोत्तरार्धगताभ्यामिष्टानिष्टशब्दाभ्यां पूर्वार्धगतेष्टनेष्टशब्दा उच्यन्ते । एतदुक्तं भवति । अष्टकवर्गफलाधिक्येन यदिष्टं फलं ग्रहाः कुर्वन्ति ते उपचयगृहमित्रस्वोच्चगाश्चेत्तत्पुष्टं कुर्वन्ति । अष्टकवर्गफलाल्पतया यन्नेष्टं कुर्वन्ति । अपचयगृहनीचारातिगताश्चेत्तस्य नेष्टस्य सम्पद्भवति प्राचुर्यं भवतीत्यर्थः । अस्मिन्पक्षे पूर्वोक्तोऽर्थः समीचीनः शास्त्रान्तरसंवादाच्च । तथा च शास्त्रान्तरम्-

"लग्नादुपचयसंस्थश्चन्द्राद्वा स्वगृहमूलतुङ्गस्थः ।
मित्रक्षेत्रगतो वा फलमतिशयितं ग्रहो दद्यात् ॥
अपचयराशौ नीचे शत्रुक्षेत्रेऽपचयजकाले स्यात् ।
यस्तु च यद्यत्पाकं फलमतिशयितं ग्रहो यथाकालम् ॥" इति ।

अथ चारवशान्निरूपणीयोऽर्थो व्याख्यायते-

उपचयगृहमित्रस्वोच्चगैरित्यत्रोपचयशब्देन ग्रहचारे जन्मराशेरारभ्य यस्मिन्राशौ ग्रहे स्थिते उपचयो वृद्धिर्भवति स राशिः उच्यते तत्र स्थितो ग्रहः स्वमित्रक्षेत्रस्वक्षेत्रोच्चगश्चेत्स्वदीयमानमिष्टं फलं करोति अन्यथानिष्टं फलं पुष्टं करोति अथवात्रापि पूर्ववदष्टकवर्गफलैरिष्टनेष्टे निरूप्येते । एतदुक्तं भवति । अष्टकवर्गेण चारवशाच्च मित्रक्षत्रोच्चस्थित्या चेष्टं फलं ग्रहाणां पुष्टं भवतीति । अष्टकवर्गचाराभ्यां दशायाः प्राधान्यं

भवति दृढकर्म फलदात्वाद्दशानिरूपणेऽपि दशादातृग्रहबलाबलं निरूपणीयम्। बलाबलनिरूपणेऽपि स्थानबलप्राधान्येन निरूपणीयम्। तदनेनैवाचार्येण स्वल्पजातके उक्तम्-मित्रोच्चस्वगृहांशोपगतानां शोभना दशाः सर्वाः। स्वोच्चाभिलाषिणामपि ननु कथितविपर्ययस्थानामिति अष्टकवर्गफलबाहुल्येऽपि फलदातृग्रहाणां दौर्बल्येऽष्टकवर्गफलानां निर्जीवितत्वमवगन्तव्यम्। अन्यथा सजीवितत्वं तस्माद्बलाबलवशादेव शुभाशुभं कल्पनीयम्। तथा च जातकसंग्रहे-

"दिक्स्थानकालचेष्टाबलयुक्तो नास्तगो न रिपुयुक्तः।
न पराजितश्च युद्धे शुभगाश्रयस्तस्य शोभना हि दशा॥"
"उक्तविपरीतसंस्था न शुभाः स्युश्चेति कीर्तितं पूर्वैः।
नीचेऽस्तगेऽरिराशौ रन्ध्रे व्ययभेऽथवा बलैर्हीनः॥
तेषां दशासु मतिमान् सम्पत्तिं निर्दिशेद्यथायोग्यम्॥" इति।

इति दशाध्याय्यां नवमोऽध्यायः॥ ९॥

अथ कर्माजीवाध्यायः १०.

(प्रहर्षिणी)

अर्थाप्तिः पितृपितृपत्निशत्रुमित्र-
भ्रातृस्त्रीभृतकजनाद्दिवाकराद्यैः।
होरेन्द्वोर्दशमगतैर्विकल्पनीया
भेन्द्वर्कास्पदपतिगांशनाथवृत्त्या॥ १॥

अथ कर्माजीवाध्यायो व्याख्यायते।

अर्थाप्तिरिति। दिवाकरे दशमगते पितृपक्षात्, चन्द्रे मातृपक्षात् कुजे सपत्नपक्षात् बुधे मित्रपक्षाद्गुरौ भ्रातृपक्षाच्छुक्रे भार्यापक्षाच्छनौ भृत्यपक्षादर्थाप्तिरित्यन्वयः। स्त्रीशब्देन भार्या विवक्षिता भार्यावशाद्गुणदोषा भवन्ति। 'अर्धं भार्याशरीरस्य' इत्याद्युक्तत्वाद्भार्याजन्मवशात्पुरुषस्य गुणदोषाश्चिन्त्याः तदर्थं स्त्रीजातकाध्यायोक्तः 'यद्यत्फलं नरभवे क्षममङ्गनानां' क्षमयोग्यं स्त्रीणां वाच्यम्। तथा च स्वल्पजातके-'पुंजन्मफलं यद्यद्घटते स्त्रीषु पतिषु तत्तासाम्। वक्तव्यं राज्याद्यं वृषणविनाशादि वा पापम्॥१॥' इति अक्षमं पतिषु वदेदित्युक्तस्यायमर्थः। तासां तु तत्र विशेषवाचिनिधने पतिमरणं, लग्नचन्द्राभ्यां शरीरं, सप्तमे च सौभाग्यं, पतिरपि चिन्त्य इति तथा चोक्तम्-

"वैधव्यं निधनगृहे पतिसौभाग्यं सुखं च यामित्रे।
सौन्दर्यं नवमगृहे विचिन्तयेत्पुत्रसम्पदं नवमे॥

एषु स्थानेषु गताः सौम्याः शुभदा बलान्विता लग्ने ।
प्रोक्ताः क्रूरास्तु नेष्टफलदा भवने शनिवार्जिताः सदा चिन्त्याः॥" इति।

युग्मेषु लग्नशशिनोरित्यत्र युग्मराश्यंशयोरिति ग्राह्यम् । ओजस्थयोरित्यत्रापि तद्वद्भवति ग्रहेऽस्तमये स्थितेंऽशके वेत्युत्तरत्र वक्ष्यति । तथा चोक्तम्-

"पुरुषर्क्षे पुरुषांशे लग्नेन्द्वोः पापयुक्तयोर्जातः ।
पुरुषः पुरुषाकृतिशीलयुता भर्तुरयोग्यासमंजसा कन्या ॥
समराशौ समभागे लग्नेन्द्वोः स्त्रीगुणान्विता कन्या ।
सौम्ययुतालंकितयोः सुभगा साध्वी सुविख्याता ॥" इति ।

ओजस्थयोस्तु । तुशब्देनाशुभत्वं सूचितम् । कन्येव दुष्टेति । कन्याशब्देन प्रजात्वमप्युक्तम् । इष्टा गुणहीना व्रजतीह दास्यं बहुजनविधेया दुःशीला प्रेष्या च । साध्वी पतिव्रता पुत्रवतीत्युदारा च समाया मायासहिता मलिनाचाराल्पसुता च कुचरित्रयुता राजप्रिया भूम्यात्मजर्क्षे मेषवृश्चिकयोरित्यर्थः । वक्रार्किजीवेन्दुज-भार्गवाणां त्रिंशांशकेषु क्रमादेतानि फलानि उक्तानि अत्र वक्रादिक्रमोक्त्या वृश्चिकराशौ व्युत्क्रमेणैतानि फलानि वक्तव्यानीति सिद्धं भवति । तानि फलानि शास्त्रान्तरे-

"भौमर्क्षे भौमांशे कन्यामृतसूचिता गुणैर्हीना ।
कन्याजननी कन्या शुक्रांशे जारभोगसन्तुष्टा ॥" इति ।

दुष्टा पुनर्भूरिति । दुष्टारिग्रहपरा भूपतिर्देव्या च । पुनर्भूर्द्विरूढा मृतप्रजप्ररोह-युक्ता सुगुणा रूपेण भर्तृपुत्रैश्च । सुगुणा कलाज्ञा काव्यकलादितत्परा तस्मात्कु-चरित्रा च ख्याता गुणैर्भोगवती जगत्प्रिया प्रसिद्धा च स्यात् । कापटीत्यादि फलं बौधे बुधराशौ कापटी, स्वच्छन्दा, नष्टप्रजा क्लीबसमा पतिहीना दरिद्रा च । सती पतिव्रता, चशब्देनाल्परतिर्गुणाढ्या, शिल्पादिकुशला प्रविकीर्णकामा निष्फलकामा वन्ध्येत्यर्थः । मृतप्रजा स्त्रीषु दुष्टतरेपि । तथा चोक्तमन्यत्र-

"सितभवने भौमांशे दुष्टा कलहप्रिया पतिद्वेष्या ।
मन्दांशे तु पुनर्भूर्मृतप्रजा रोगयुता नित्यम् ॥
रूपान्विता गुणाढ्या जीवांशे भर्तृपुत्रसम्पन्ना ।
कुचरित्रा सौम्यांशे काव्यकलागेयवाद्यसन्तुष्टा ॥
शुक्रांशे भोगवती विदग्धदयिता जगत्प्रिया ख्याता ।
बुधभवने भौमांशे स्वच्छन्दकामिनी विनष्टसुता ॥
मन्दांशे पतिहीना कृच्छ्रान्नेनोपजीवती नित्यम् ।
अल्पसुता क्षीणायुर्जीवांशे शिल्पिनी बुधांशे ॥
वन्ध्या मृतप्रजा वा शुक्रांशे स्त्रीषु दुष्टतरा ।" इति ।

स्वच्छन्दा स्वैरचारिणी पतिघातिनी पतिघ्नी बहुगुणा पुत्रादिगुणवती शिल्पनिपुणा असाध्वी दुष्टनाररता, असती चासन्ततिश्चार्कभे वाचाला बहुभाषिणी विदेशरता परपुरुषगामिनी कुलटा कृशा दरिद्रा कुलहीना च नृपवधूः। पुंश्चेष्टिता कार्यपरा पुरुषाकृतिशीलयुता अगम्यगागम्यपुरुषगामिनी अल्पसुतरागवती। जैवेनैकगुणेत्यादि नैकगुणा पत्यनुसारिणी पुत्रवती शीलवती चाल्परतिरल्पसुखा च कापटिका कन्याजननी स्वतन्त्रनिरता चातिगुणा भर्तृसम्पदादिगुणसम्पन्ना विज्ञानयुक्ता धर्मपरा शिल्पकुशला शास्त्रार्थज्ञाता सती पतिव्रता च दासी बहुजनविधेया पुत्रहीना च नीचरता नीचे कर्मणि रता अथवा नीचरता गार्भिणीयजनरता दुर्भगेत्यर्थः पतिरता पत्युरिष्टा सुभगा दुष्टा तु भग्नत्वधर्मा कुलटा कुलघ्नी च अप्रजा तु वन्ध्या चारित्रलोचना च-शब्देन पूर्वोक्ता दुष्टा चेत्यर्थः। अंशकैस्त्रिंशांशकैरिति शशिलग्नेति शशिलग्नयोर्बलयुक्तेन युक्तैस्त्रिंशांशकैरिदं विचिन्तयेत्। अथवा कयोर्योगे त्रिंशांशकैर्वा बलाबलविकल्पेन तयोः शशिलग्नयोरुक्तं फलं विचिन्तयेत्। बलाबलविकल्पेन त्रिंशांशकाधिपतेर्बलवशादुक्तफलप्राचुर्याल्पत्वमूह्यमित्यर्थः। दृक्संस्थावित्यादियोगद्वयं दृक्संस्थौ परस्परदृष्टौ यदि स्त्रीभिर्नराकृतिस्थिताभिः स्त्रीप्रदीप्तं मदनविषानलं संशान्तिं नयतीति इत्येको योगः। शौक्रे राशौ यदि कुम्भांशक उदेति तदा द्वितीयः। अथवा परस्परांशगतौ सितासितौ परस्परदृष्टौ शौक्रराशावुदयाति कुम्भांशकश्च भवति। यदि स्त्रीभिः स्त्रीमदनविषानलं संशान्तिं नयतीत्येको योगः। इति केचित् तथा च सारावल्याम्—

"शौक्रयासितौ यदि परस्परभागलेशे
शौक्रे च दृष्टिपथगावुदये घटांशे।
स्त्रीणामतीव मदनाभिगदः प्रवृद्धः
स्त्रीभिः शमं च पुरुषाकृतिभिर्लभन्ते॥" इति।

शून्ये कापुरुष इत्यादिश्लोके परगृहे नित्यं प्रवासान्वित इत्यत्र स्थितग्रहे स्वगृहवासीति वाच्यं भवति। क्लीबोऽस्ते बुधमन्दयोरित्यत्र तयोर्युगपत्स्थितिरपेक्षितेति स आग्नेयैरित्यादिश्लोके क्रूराणां सप्तमे प्रत्येकं फलमुक्त्वा इदानीं क्रूरस्य फलोक्तिः सविशेषा विहिता हीनबलवत्त्वं विशेषः सौम्येक्षितत्वं च। तथा चोक्तम्—

"बलहीनेऽस्तगे पापे सौम्यग्रहनिरीक्षिते।
भर्त्रा विसृज्यते नारी० इति॥"

इति पूर्वार्धं स्पष्टम्। कौजेऽस्तांश इति लग्ने यतिमोंश उदेति सप्तमे ततिमोंशः अत्रांशशब्देनोच्यते 'भवति ग्रहेऽस्तमये स्थितेंऽशके वा' इति वक्ष्यमाणविधिनैवत्सिद्ध्यति। तयोर्बलवशात्फलनिर्देशः सौरिणेत्यत्र। सौरिणा दृष्टेऽस्तां

इत्यन्वयः। श्लोकपूर्वार्धे पापदृष्टे इत्यत्र पापैर्दृष्टे इति समासविवरणे कृते पृथक् स्थितो दृष्टशब्दः। सौरिणेत्यत्राध्याहार्यः, तथा च सारावल्याम्-

"द्यूने कुब्जनवांशे शनिदृष्टे चापि रोगयोनिः स्त्री" इति 'वृद्धो मूर्खः' इत्यादि-श्लोकद्वयं स्पष्टार्थम्। 'ईर्ष्यान्वित' इत्यादिश्लोकद्वयं स्पष्टार्थम्। क्रूरेत्यादिश्लोके तु निधनेश्वरश्चापि चिन्त्य इत्युक्तं भवति। क्रूरेऽष्टमे विधवता धवो भर्ता विगतधवता भर्तृमरणमित्यर्थः। अर्थात्सौम्येऽष्टमगते सति भर्तृमरणात्पूर्वं स्वमरणं भवति। तथा च सारावल्यामुक्तम्-

"पापेऽष्टमे विधवता निधनाधिपतिर्नवांशके यस्य
तस्य दशायां मरणं तस्याः स्वयं शुभे तत्स्थे॥" इति।

तदा मरणमित्यत आह-"निधनेश्वरांशे यस्य स्थितो वयसि तस्य समे प्रदिष्टा" इति निधनेश्वरो यस्य नवांशे स्थितस्तस्य समे वयसि विधवता प्रदिष्टा समे वयसीत्यनेन तस्य निसर्गदशाकाले इति केश्चिद्व्याख्यायते। परे तु तस्य दशाकालेऽन्तर्दशाकाले वेत्युच्यते। तथा च सारावल्याम्। उक्तस्यार्थोऽत्राचार्येण भावाध्याये-

"समुपचयविपत्तिः सौम्यपापेषु सत्यः
कथयति विपरीतं रिःफषष्ठाष्टमेषु॥"

इत्यनेनाष्टमभवनस्य बलाबलं तथा तस्य बलाबलं च निरूपणीयम् भवति। एतद्भावाध्यायेप्युपदिष्टम्-

"सुहृदरिपरकीयस्वर्क्षतुङ्गस्थितानां
फलमनुपरिचिन्त्यं लग्नदेहादिभावैः।" इति।
"उच्चत्रिकोणस्वसुहृच्छत्रुनीचगृहार्कगैः।
शुभसम्पूर्णपादोनदलपादाल्पनिष्फलम्॥"

इत्यनेनाष्टमगतस्य क्रूरस्य 'लग्नात्पुत्रकलत्रभे शुभपतिप्राप्तेऽथवालोकिते चन्द्राद्वा यदि सम्पदस्ति हि तयोर्ज्ञेयोऽन्यथासम्भवः'। इत्यनेन पुत्रकलत्रसम्पत्निरूपण-विधानेन सर्वभावसम्पदसम्पन्निरूपणप्रकार उक्तः। तथा चार्यपुत्रेणोक्तम्-

"यो यो भावः स्वामियुक्तेक्षितो वा
सौम्यैर्वा स्यात्तस्य तस्याभिवृद्धिः।
पापैरेवं तस्य भावस्य हानि-
र्निर्देष्टव्या पृच्छतां जन्मतो वा॥"

तस्मादष्टमस्थः क्रूरोऽष्टमाधिपतित्वे वैधव्यकृन्नेति सिद्धं भवति। क्रूरेऽष्टमे विधवेत्युक्तो विधवता नियता इत्यत आह-

'सत्स्वर्थगेषु मरणं स्वयमेव तस्य' इति सत्सु शुभग्रहेषु धनगतेषु क्रूरेऽष्टमे सति तस्याः स्वयमेव मरणमष्टमगतस्य शुभदृष्टत्वात्स मरणादपि गरीयो भर्तृमरणं भवति। अथवा नष्टजातकाध्याये—

"एवं कलत्रसहजात्मजशत्रुभेभ्यः
प्रष्टुर्वदेदुदयराशिवशेन तेषाम्—"

इत्यनेन यद्भावो निरूपणीयस्तद्भावं विलग्नं कृत्वा तद्भावस्य धनादिभावाः सर्वेऽपि चिन्त्या इत्युक्तं भवति। विहितस्य सप्तमभावस्य भर्तृस्थानभूतस्याष्टमे लग्नाद्धनस्थाने स्थितेषु शुभग्रहेषु भर्तुरायुरस्तीति चिन्त्यम्। भर्तुरायुषि सति क्रूरेऽष्टमे सति तस्य फलं स्वमरणमिति। 'सत्स्वर्थगेषु मरणं स्वयमेव तस्या' इत्यनेनोक्तं भवति तस्माद्भर्तृजन्मग्रहराशिवशात्तस्यायुषि दीर्घे सति स्त्रीजन्मनि क्रूरेऽष्टमे तस्याः स्वयमेव मरणं वक्तव्यमित्यादि विचारणीयमिति कन्यालिगोहरिषु चाल्पसुतत्वमित्यनेनाल्पसुतराशयो विहिताः। कन्यालिगोहरयोल्पसुतराशयस्तेषां पुत्रस्थानगतत्वमपि कष्टमिति चकारात्सूचितम्। तदपि सारावल्यामुक्तम्—

"कन्यालिवृषसिंहाः पञ्चमगा यस्य सूतिकाले।
स्युस्तस्याल्पसुतत्वं स्यादिति स्त्रीणां पुत्रचिन्ता तु"
"यद्यत्फलं नरभवे क्षममंगनानां तत्तद्वदेत्०"

इत्यत आह "निधनेश्वरोंऽशे यस्य स्थितो वयसि तस्य समे प्रदिष्टा इति निधनेश्वरो यस्य नवांशे स्थितस्तस्य समये वयसि विधवता प्रदिष्टा समे वयसीत्यनेन तस्य निसर्गदशाकाले इति केश्चिद्व्याख्यायते। परं तु तस्य दशाकालेऽन्तर्दशाकाले वेत्युच्यते। तथा च सारावल्याम्—उक्तस्यार्थोऽत्राचार्येण भावाध्याये—

"समुपचयविपत्तिः सौम्यपापेषु सत्यः
कथयति विपरीतं रिःफषष्ठाष्टमेषु॥"

इत्यनेनाष्टमस्थस्य पापस्य मरणप्रदत्वं निरूप्यमाणे।

'फलमखिलमिदं यदत्र भावाद्भवनभनाथगुणैर्विचिन्तनीयम्' इत्यनेनाष्टमभवनस्य बलाबलं तथा तस्य बलाबलं च निरूपणीयं भवति। एतद्भावाध्यायेऽप्युपदिष्टम्—

"सुहृदरिपरकीयस्वर्क्षतुंगस्थितानां
फलमनुपरिचिन्त्यं लग्नदेहादिभावैः।"
"उच्चत्रिकोणस्वसुहृच्छत्रुनीचगृहार्कगैः।
शुभसम्पूर्णपादोनदलपादाल्पनिष्फलम्॥"

इत्यनेनाष्टमगतस्य क्रूरस्य "लग्नात्पुत्रकलत्रभे शुभपतिप्राप्तेऽथवालोकिते चन्द्राद्वा यदि सम्पदस्ति हि तयोर्ज्ञेयोऽन्यथासम्भवः।" इत्यनेन पुत्रकलत्रसम्पन्निरूपण-

विधानेन 'सर्वभावस' इत्यनेन पूर्वोक्तप्रकारो निरूपयितव्य इति सिद्धं भवति। 'सौरे मध्यबले बलेन सहितः' इति श्लोकः स्पष्टार्थः। 'पापेस्ते' इत्यादिश्लोके उद्वाहे वरणविधावित्युत्तरार्धे वरणविधावित्यत्र वरणं कन्यावरणं प्रदानं चिन्ताप्रश्नः। एतेषु तत्स्त्रीजातकोक्तं सर्वमपि विधेयमित्यर्थः। अलमतिप्रसंगेन।

प्रकृतमनुसरामः। 'भेन्द्वर्कास्पदपतिगांशनाथवृत्त्या' इति 'उदयरविशशांकप्राणिकेन्द्रादिसंस्थाः' इति पूर्वमुक्तम्। इदानीं भेन्द्वर्कास्पदपतिगांशनाथवृत्त्येत्यत्रापि रविवशात्फलं चिन्त्यमित्युक्तं भेन्द्वर्कास्पदपतिराशिवृत्त्या तत्र ग्रहगतवृत्त्या तदधिपस्वभावादि निरूपयितव्यम्-तथा च सारावल्याम्-

"होरेन्द्वोर्बलयुक्तायो दशमस्तत्स्वभावकं कर्म।
तत्स्थाधिपपरिवृद्ध्या वृद्धिर्ज्ञेयान्यथा हानिः॥
जाङ्गलमथवानूपं ततो भयं वा ग्रहं निरीक्षेत।
ग्राम्यमथारण्यं वा सौम्यर्क्षे पापभवनं वा॥
द्विपदचतुष्पदरूपं सरीसृपं वा ततो भयम्।
चेत्समयपं तद्भवनं यादृशस्तत्स्वयं वा॥
प्रवदेत्समप्रदेशे कर्मप्राप्तिस्तत्तत्सदृशी।
तस्माद्दशमं भवनं प्रसवे बुद्ध्येत यत्नेन॥"

इत्यत्रापि बलवशात्फलनिर्देशः अधिपतिः स्वोच्चगतश्चेदुत्कृष्टवृत्त्या नीचगतश्चेन्नीचवृत्त्या द्रव्याण्यपि तथाविधानि उच्चगतश्चेद्यत्नेन सिद्ध्यति नीचराशिगतश्चेद्यत्नेन दशमराशौ बलवति तद्देशवृत्तिः, अधिपयुतराशौ बलवति तद्देशे वृत्तिः, दशमाधिपयुक्तांशनाथे बलवति अंशकसमदेशः लग्नचन्द्रयोर्दशमगतैर्दिवाकराद्यैः राजादितोऽर्थप्राप्तिश्चिन्त्या। 'विप्रादित इति वर्णाश्चिन्त्याः। 'प्रथितश्चतुरोऽटन' इत्यादिराशिशीलफलं योज्यम्। तत्र राश्यंशयोर्बलवतोर्दशमाधिपस्य फलं चिन्त्यं दिवाकराद्येषु दशमर्क्षस्थितेषु तदुक्तजनाद्धनसिद्धिः। तदभावे 'भेन्द्वर्कास्पदपतिगांशनाथवृत्त्या इति केचित्। तथा चोक्तम्-

"दशमे वा ग्रहरहिते चन्द्राद्भानोस्तयाद्वयोर्बलिनः।
तदधीश्वरांशनाथस्वभाववृत्त्या च जीवनं कुरुते॥ १॥

(प्रहर्षिणी)

अर्कांशे तृणकनकोर्णभेषजाद्यै-
श्चन्द्रांशे कृषिजलजाङ्गनाश्रयाच्च।

धात्वग्निप्रहरणसाहसैः कुजांशे
सौम्यांशे लिपिगणितादिकाव्यशिल्पैः ॥ २ ॥

अर्कांशे तृणकनकोर्णभेषजाद्यैरित्यत्रादिशब्देन फलवृक्षधातुविक्रयशिल्पद्यूतराजसेवादयोऽपि गृह्यन्ते । तथा चोक्तम्—

"अर्कांशे फलवृक्षैर्भेषज्यैर्धातुविक्रयैः शिल्पैः।
द्यूतशाठ्यकरैर्भूपैर्वा वित्तमाप्नुयात्सततम् ॥" इति ।

"चन्द्रांशे कृषिजलजांगनाश्रयाच्च" इति च-शब्देन मणिगोमहिषशर्करादयोऽपि गृह्यन्ते । । तथा चोक्तं शास्त्रान्तरे—

"चन्द्रांशे मणिपोतैः कृषिजलवस्त्रादिभिर्धनं लभते ।
गोमहिषशर्कराद्यैः स्त्रीसंगमान्मातृदेवताद्वापि ॥" इति ।

'धात्वग्निप्रहरणसाहसैः कुजांश' इत्यत्र कुजस्य क्षेत्राधिपत्वात्क्षेत्रादिना धनवानिति । अत्र बुधस्य लिपिगणितादिकाव्यशिल्पैरित्यत्र शिल्पशब्देन चित्रद्यूतनृत्यकर्मादि च गृह्यते । तथा चोक्तम्—

"लिपिलेखकाव्यगणितैर्नृत्यैस्तथा तदादिभिर्वृत्तिम् ।
तदर्धांशे सौम्यांशे हयनादिभिर्दिशेन्मतिमान् ॥ २ ॥" इति ।

(प्रहर्षिणी)

जीवांशे द्विजविबुधकरादिधर्मैः
काव्यांशे मणिरजतादिगोमहिष्यैः ।
सौरांशे श्रमवधभारनीचशिल्पैः
कर्मेशाध्युषितनवांशकर्मसिद्धिः ॥ ३ ॥

जीवांशे द्विजविबुधाकरादिधर्मैः इत्यत्र धर्मशब्देन मन्त्रजपवृत्त्यादि च गृह्यते। अत्रापि शास्त्रांतरमस्ति । तथा च शास्त्रान्तरे—

"अध्ययनदेवतार्चनमन्त्रजपादिवृत्तिभिर्धनवान् ।
कालज्ञानमितिस्तैस्तथा गुरोरंशांशका ज्ञेयाः ॥" इति ।

. शौक्रांशे मणिकनकादिगोमाहिष्यैरित्यत्रादिशब्देनौषधालंकारनृत्यादि च गृह्यते । तथा च शास्त्रान्तरे—

"गोमहिषाश्वाजाद्यैः स्त्रीसंगैरौषधैरलंकारैः ।
नृत्यादिविविधकुशलैः शुक्रांशे वित्तवान् सुखी भवति ॥" इति ।

सौरांशे श्रमवधभारनीचशिल्पैरित्यत्र—श्रमशब्देन अध्वश्रमनप्रेष्यवृत्तिखगमनावृत्त्यादयो गृह्यन्ते । नीचशब्देन नीचवृत्त्यादयो गृह्यन्ते । तथा च शास्त्रान्तरे—

"सौरांशे फलमूलैश्चित्रैर्भारोद्वहैः श्रमैर्धनवान् ।
नीचप्रेष्यजनाद्यैर्धान्यकुधान्यादिविक्रयैर्वापि ॥
अंशाधिपोतिबलवान् यत्नादर्थागमं सुखं कुरुते ।
अंशाधिपोतिनीचःप्रोक्तं फलमल्पमेव विदधाति
राश्युक्तदिग्विभागं देशं सश्चिन्तयेत्सदैवज्ञः ।
लग्नात्तु दशमराशेः स्वभावदेशं विनिर्दिशेदथवा ॥
स्वस्वामिदृष्टयुक्तं स्वदेशफलदायकं मुनिभिरुक्तम् ।
अन्येन सहितं दृष्टं परदेशफलप्रदं वाच्यम् ॥
तदधीशे चरभांशे प्रवासतोऽर्थागमं सुखं लभते ।
स्थिरभांशे स्वकदेशादुभयांशे सर्वतो धनप्राप्तिः ॥
वक्रगते तदधीशे बहुप्रकारैर्धनं समाप्नोति ।
भाग्यानुरूपतोऽर्थान्विनिर्दिशेत्सर्वतोपि पूर्वोक्तम् ॥
चन्द्राद्दशमे सौम्ये बलवानेको न शत्रुयुतदृष्टः ।
जनयेद्युगान्तकीर्तिम्० ॥" इति-

जन्मकालादन्यत्रापि कर्मेशो यस्मिन्नवांशके वसति तस्य नवांशकस्य यत्कर्म विहितम्, अर्कांशे तृणकनकोर्णभेषजाद्यैरित्यादि तत्तदानीं सिद्ध्यतीत्यर्थः । अन्यथेदं पुनर्वचनं स्यात् । एतन्नवांशकोक्तं द्वादशांशेपि चिन्त्यम् । अन्यच्च कर्मेशाध्युषितनवांशाधिपतिः सूर्यश्चेन्नखदन्तचर्म्मकनककौर्याध्वभूपाहवैः स्वं संचिन्त्यम् । चन्द्रश्चेदिक्षुक्षीरविकारवस्त्रकुसुमक्रीडातिलान्नश्रमैः । कुजश्चेद्रिपुविमर्दभूपप्रहजक्षित्याविकाजैर्धनप्राप्तिः । बुधश्चेद्दौत्यसुहृद्गुरुद्विजधनं विद्वत्प्रशंसायशोयुक्तिद्रव्यसुवर्णवेसरादिभिश्च धनप्राप्तिः । गुरुश्चेन्माहात्म्योद्यमभन्त्रनीतिनृपतिस्वाध्याययज्ञादिभिः । शुक्रश्चेद्गीतप्रमोदात् सुरभिद्रव्यान्नपानाम्बरस्त्रीरत्नद्युतिमन्मथोपकरणादिभिर्धनप्राप्तिः । शनिश्चेत्खरोष्ट्रपक्षिमहिषीकुधान्यादिभिर्धनप्राप्तिरित्यादि चिन्त्यम् । कर्मेशाध्युषितसमानकर्मसिद्धिरितिपाठे कर्मेशाध्युषितराशिनवांशसमाने देशे कर्मसिद्धिः देशोत्र जाङ्गलानूपमरुसंज्ञितो ग्रामारण्यपौरसंज्ञितश्च राशिवद्विज्ञेय इति । भेन्द्वर्कास्पदराशीनां ग्रहाभावे कर्मविशेषसिद्धिर्निरूपणीयेति पूर्वमुक्तम् । कर्मविशेषास्तु शास्त्रान्तरादवगन्तव्याः । उग्रग्रहैरित्यत्र गार्गिवचनम् ।

"चतुर्थाष्टमगैः शुक्रात्सौराराकैर्हुताशनात् ।
तेषां द्वितयमध्यस्थे तथा शुक्रे प्रपातनात् ॥
शुक्रे सद्योगदृग्हीने पापाद्भार्यावधो भवेत् ॥" इति ।

शोषी परस्परग्रहांशयोरित्यत्र गार्गिवचनं परस्परगृहे यातो यदि तदा तौ वा पितावंशको भवतोऽर्कशीतांशुस्तदा शोषी ज्ञायते। तथा च सारावल्याम्—

"आरामपुत्रसेवाकृषिरथ वाणिज्यसूतकार्येण।
जीवन्ति जनाः नित्यं मेषगणे दशमराशिस्थे॥
वृषभगणे दशमस्थे शकटचतुष्पदविहंगगृहधान्यैः।
संग्रहकर्मणि निरता जांगलदेशे वसन्ति वै बहुशः॥
जलवणिजः सुसमृद्धा मुक्तादिभिरर्थसंयुक्ताः।
नृमिथुनवर्गे दशमे शस्त्रानलयोनिप्रस्तराजीवाः॥
अहितुण्डिकया वृत्त्या कर्किणि वर्गे तदा दशमे।
सव्यूहका मणीनां पाषाणकरूप्यकीटाश्च।
कर्षणनिरता लेये जीवविधानाश्च वाणिजिकाः॥
शाकटिकास्तक्षणका हैरण्यकगन्धविक्रये निपुणाः।
गन्धर्वशिल्पलेख्यैः कन्यावर्गे सदाविभवाः॥
प्रायोऽज्यादुपदेशाद्धिरण्यपरिवर्तनादियोगाच्च।
जायन्ते मनुजानां व्यवहारे लाभभाजनानीह॥
सततं वरधान्यानां मूलानां ये विशेषतो वणिजः।
फलमूललब्धवित्ताः कृषीवलाश्चैव जायन्ते॥
धनुषो वर्गे दशमस्थानस्थिते जनाः कलावृत्त्या।
स्त्रीसम्पर्के लब्ध्वा जनितैश्वर्याः प्रजायन्ते॥
नित्योद्युक्ताश्चौराः पृथवीपतिसेवकाः सदा लुब्धाः।
पापा देहचिकित्सानिरता लोहकदाहजीविनः क्रूराः॥
अन्त्यकवर्गे खस्थे धान्यानां चोपजीविनोत्पन्नम्।
नृपसचिवदुर्गदशमे कुरुङ्गवर्गे च वारिपण्यधनः॥
भूमीविभवं खट्वारामारोपणरसायनैर्जीवेत्।
जातः शस्त्रानलक्रमभेदचौर्यादिभिर्जीवेत्॥
वनवृत्त्या घटवर्गे भारवहस्कन्धजीविनः सुभगाः।
सुभगं पत्रात्सलिलागमात्मपोषणादेश्च।
विक्रयतो वै वर्गे मीनप्रभवे च दशमस्थे॥"

एवं राश्यंशकाभ्यामाजीववृत्तिर्हि निरूपणीया बहुषु लक्षणेषु बलवद्ग्रहवशान्निर्णयः कर्तव्यः। जातिदेशकालावस्थानुरूपं फलं वाच्यम्॥ ३॥

(प्रहर्षिणी)

मित्रारिस्वगृहगतैर्ग्रहैस्ततोर्थान्
तुङ्गस्थे बलिनि च भास्करे स्ववीर्यात् ।
आयस्थैरुदयधनाश्रितैश्च सौम्यैः
सश्चिन्त्यं बलसहितैरनेकधा स्वम् ॥ ४ ॥

इति श्रीमदवन्तिकाचार्यद्विजराजवराहमिहिरकृते बृहज्जातके कर्म्माजीवाध्यायो दशमः ॥ १० ॥

मित्रेति । बहुप्रकारं धनं संचिन्त्यम् । 'तुङ्गस्थे बलिनि च भास्करे स्ववीर्यात्' इत्यत्रार्कस्य पितात्मकत्वात् पितृपक्षादर्था भवन्ति । आत्मस्वरूपत्वात्स्वप्रभवाच्चार्था भवन्ति । आयस्थैरित्यत्र कर्मस्थानादवृद्धिर्धनस्थानेन धनं, लाभस्थानेनागमोपायः । उदयेनात्मस्वभाव इति सूचितम् । तथा चोक्तम्-

"दशमेशस्य वृत्त्यैव धनेशस्योचितं धनम् ।
लाभाधीशादवाप्नोति विलग्नेशात्मके नरः ॥"

इत्येवं वराहमिहिरहोराशास्त्रे प्रथमाध्यायादारभ्याध्यायदशके विदितोर्थः प्रायशोत्र व्याख्यातः उपरितनाध्यायार्थाश्च केचिद्व्याख्याताः । अत्र पुनर्व्याख्यानकौशलाद्यभावात्पूर्वापरपर्यालोचननैपुण्यभावादज्ञानाच्च मूलग्रन्थानुसारतः पुनर्वचनम् । अपशब्दप्रयोगन्यायविरोधश्च अत्र सम्भवः तस्मादेतां व्याख्यां कश्चिद्बुधः पश्यति चेत्क्षन्तुमर्हति । नैषा पाण्डित्यप्रकटनया कृता वागर्था मन्दबुद्धये स्वशिष्यायोपदेष्टुमेवेति ॥ ४ ॥

अथ जातकलेखनक्रमो लिख्यते-

(अनुष्टुप्)

"अभिवाद्य गुरूनादौ गणेशं स्वेष्टदेवताम् ।
सूर्यादिकान्ग्रहान्सर्वानारभेज्जातकं बुधः ॥
अहर्गणं लिखेदादौ राशिमाख्यां तथैव च ।
पश्चात्सूर्यादिखेटानां स्फुटवाक्यानि विन्यसेत् ॥
अनन्तरं कलेर्वाक्यं व्याख्यानवदुदाहरेत् ।
ततो मन्दं ततो जीवं मासं तच्चन्द्रमेव च ॥
ऋक्षं सनाडिकं वारं दिनराश्योर्विकल्पनम् ।
प्राह्णपूर्वाह्णमध्याह्नानपराह्णं तथैव च ॥

सायाह्नं पूर्वरात्रादीनेवमेव लिखेद्बुधः ।
ततो राशिं सघटिकं पक्षभेदं तिथिं तथा ॥
करणं नित्ययोगं च चन्द्रपश्चाङ्गमेव च ।
दिवसं सगणं योनिं मृगवृक्षविहङ्गमान् ॥
पृथिव्यादि ततो भूतं तारादीनां च देवताः ।
ग्रहन्यासं लिखेत्पश्चात्षड्वर्गं तत्फलं तथा ॥
पंचांगानां फलं पश्चात्ततो भावस्फुटानपि ।
पश्चाद्ग्रहस्थितेर्व्याख्या ततो भावफलान्यपि ॥
पश्चाल्लग्नांशकाख्यां च तत्फलान्सकलानपि ।
फलयोगांश्च सकलानंशकाख्यां तथैव च ॥
अष्टवर्गं लिखेत्पश्चात्तद्व्याख्यां विलिखेत्पुनः ।
एवं विलिख्य बहुधा दशाः सूक्ष्मं विचारयेत् ॥
उच्चनीचं तदा चक्रं ततो नाक्षत्रमेव च ।
अन्यां दशां च संवीक्ष्य संवादमपि चिन्तयेत् ॥
मातापित्रोश्च निर्याणं पुत्रोत्पत्तिं तथैव च ।
आत्मनस्तु गुणान्दोषानेवमेव विचिन्तयेत् ॥
निर्याणन्तु ततो दृष्ट्वा स्थानं मन्दार्यभास्करान् ।
दशासंवादमालोक्य निर्याणं विलिखेद्बुधः ॥
अथवाऽहर्गणं चैव सद्रेष्काणामिति स्फुटम् ।"
"स्फुरतु भुजगहारं मम हृदि तेजो हालाविषाहारम् ।
श्वेतशरीरशुभत्वं कृतारण्यविहारं श्वेतं शीतांशुशेखरम् ॥"

इति श्रीवराहमिहिरकृते बृहज्जातके दशाध्यायी (नौका) टीकायां दशमोऽध्यायः ॥ १० ॥

॥ समाप्तोऽयं ग्रन्थः ॥

पुस्तक मिलनेका ठिकाना—

खेमराज श्रीकृष्णदास,

अध्यक्ष "श्रीवेंकटेश्वर" स्टीम् प्रेस-बम्बई.

क्रय्य पुस्तकें (ज्योतिषग्रंथाः)

नाम.	की. रु. आं.
सूर्यसिद्धान्त–संस्कृत गूढार्थदीपिका सहित और बलदेवप्रसाद मिश्रकृत भाषाटीकासहित इसमें कालविभागादि ग्रहगतिका कारणादि पूर्वपश्चिमादिरेखानिर्णय स्पष्टचंद्र सूर्यादिछायाज्ञान चंद्रलम्बन सूर्यग्रहण परिलेख ग्रहदर्शन नक्षत्रस्थान उदयास्त कालनिर्णय चन्द्रोदय पाताधिकार अध्यात्मविद्या गोलयंत्रादि कालनिर्णयादि बहुत विषयहैं	२–०
सिद्धान्तदैवज्ञविनोद–पंडित मनीरामविरचित संस्कृत भाषाटीका समेत इसमें मुहूर्तनिर्णय अमूर्त्तकालमीमांसा भूगोलखगोलवर्णन सृष्ट्यादिअहर्गण मध्यमग्रहानयनविधि ग्रहोंके मन्दोच्चतानयन भौमादिका पातानयन ग्रहोंके क्रमसे स्फुटीकरण भौमादिकोंके पात स्पष्ट करनेकी विधि चन्द्र सूर्यग्रहण लानेकी विधि ग्रहयुद्धोदाहरण ग्रह और नक्षत्रके योग ग्रहउदयास्तविधि पञ्चाङ्ग बनानेकी विधि प्रतिवर्ष उपकरणसारिणी ग्रहके नक्षत्र और राशिचार करनेकी विधि व्यगुभुज भागाक्षर सारणी आदि दरशायाहै, ज्योतिषीके लेनेयोग्यहै	२–०
परमसिद्धान्तज्योतिष–प्रेमवल्लभविरचित गणितभाग गोलज्ञान मध्यमाधिकार जीवनायक खेटस्पष्ट चालापक्रमानयन उदयास्त त्रिप्रश्नशृंगोन्नत्य ग्रहणाधिकार पातयोग यंत्राधिकार निश्चयाधिकार देशज्ञानादि विषय हैं	२–०
ग्रहलाघव–सान्वयभाषाटीका–गणेशदैवज्ञकृतमूल और पंडितरामस्वरूपकृत अन्वय भाषाटीका और उदाहरण सहित ग्लेज	१–०
दीर्घवृत्तलक्षण–श्रीयुत महामहोपाध्याय पं० सुधाकरद्विवेदिनिर्मित	०–८
लीलावती–भास्कराचार्यकृत मूल और रामस्वरूपकृत भाषाटीकासहित व्यक्तगणितमें अपूर्व है इससे सबप्रकारका गणित करसक्तेहैं ग्लेज	१–८
,, तथा रफ	१–४
कर्णकुतूहल–सटीक उदाहरणसहित–ब्रह्मपक्षीय गणितग्रंथ	०–१२